# शङ्कराचार्य जयन्ती

# पाठमाला

Stotras for recitation during śaṁkarācārya jayantī

April 22 – 26 2012

Recite this every day:

॥ प्रातःस्मरणस्तोत्रम् ॥

प्रातः स्मरामि हृदि संस्फुरदात्मतत्त्वं सच्चित्सुखं परमहंसगतिं तुरीयम् ।

यस्तु प्रजागरसुषुप्तमवैति नित्यं तद्ब्रह्म निष्कलमहं न च भूतसङ्घः ॥ १ ॥

प्रातर्भजामि मनसां वचसामगम्यं वाचो विभान्ति निखिला यदनुग्रहेण ।

यन्नेति नेति वचनैर्निगमा अवोचंस्तं देवदेवमजमच्युतमाहुरग्र्यम् ॥ २ ॥

प्रातर्नमामि तमसः परमर्कवर्णं पूर्णं सनातनपदं पुरुषोत्तमाख्यम् ।

यस्मिन्निदं जगदशेषमशेषमूर्तौ रज्ज्वां भुजंगम इव प्रतिभासितं वै ॥ ३ ॥

श्लोकत्रयमिदं पुण्यं लोकत्रयविभूषणम् । प्रातःकाले पठेद्यस्तु स गच्छेत्परमं पदम् ॥ ४ ॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ प्रातःस्मरणस्तोत्रम् संपूर्णम् ॥

Recite these on day 1:

॥ गणेशपञ्चरत्नस्तोत्रम् ॥

मुदाकरात्तमोदकं सदाविमुक्तिसाधकं कलाधरावतंसकं विलासिलोकरञ्जकम् ।

अनायकैकनायकं विनाशितेभदैत्यकं नताशुभाशुनाशकं नमामि तं विनायकम् ॥ १ ॥

नतेतरातिभीकरं नवोदितार्कभास्वरं नमत्सुरारिनिर्जरं नताधिकापदुद्धरम् ।

सुरेश्वरं निधीश्वरं गजेश्वरं गणेश्वरं महेश्वरं तमाश्रये परात्परं निरन्तरम् ॥ २ ॥

समस्तलोकशङ्करं निरस्तदैत्यकुञ्जरं दरेतरोदरं वरं वरेभवक्त्रमक्षरम् ।

कृपाकरं क्षमाकरं मुदाकरं यशस्करं मनस्करं नमस्कृतां नमस्करोमि भास्वरम् ॥ ३ ॥

अकिञ्चनार्तिमार्जनं चिरन्तनोक्तिभाजनं पुरारिपूर्वनन्दनं सुरारिगर्वचर्वणम् ।

प्रपञ्चनाशभीषणं धनञ्जयादिभूषणं कपोलदानवारणं भजे पुराणवारणम् ॥ ४ ॥

नितान्तकान्तदन्तकान्तिमन्तकान्तकात्मजं अचिन्त्यरूपमन्तहीनमन्तरायकृन्तनम् ।

हृदन्तरे निरन्तरं वसन्तमेव योगिनां तमेकदन्तमेव तं विचिन्तयामि सन्ततम् ॥ ५ ॥

महागणेशपञ्चरत्नमादरेण योऽन्वहं प्रगायति प्रभातके हृदि स्मरन् गणेश्वरम् ।

अरोगतामदोषतां सुसाहितीं सुपुत्रतां समाहितायुरष्टभूतिमभ्युपैति सोऽचिरात् ॥ ६ ॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ श्रीगणेशपञ्चरत्नस्तोत्रं सम्पूर्णम् ॥

## Recite this every day:

|| prātaḥsmaraṇastotram ||

prātaḥ smarāmi hṛdi saṁsphuradātmatattvaṁ saccitsukhaṁ paramahaṁsagatiṁ turīyam |
yastu prajāgarasuṣuptamavaiti nityaṁ tadbrahma niṣkalamahaṁ na ca bhūtasaṅgaḥ ||1||

prātarbhajāmi manasāṁ vacasāmagamyaṁ vāco vibhānti nikhilā yadanugraheṇa |
yanneti neti vacanairnigamā avocaṁstaṁ devadevamajamacyutamāhuragryam ||2||

prātarnamāmi tamasaḥ paramarkavarṇaṁ pūrṇaṁ sanātanapadaṁ puruṣottamākhyam |
yasminnidaṁ jagadaśeṣamaśeṣamūrtau rajjvāṁ bhujaṁgama iva pratibhāsitaṁ vai ||3||

ślokatrayamidaṁ puṇyaṁ lokatrayavibhūṣaṇam |
prātaḥkāle paṭhedyastu sa gacchetparamaṁ padam ||4||

|| iti śrīmatparamahaṁsaparivrājakācāryasya śrīgovindabhagavatpūjyapādaśiṣyasya
śrīmacchaṅkarabhagavataḥ kṛtau prātaḥsmaraṇastotram saṁpūrṇam ||

## Recite these on day 1:

|| gaṇeśapañcaratnastotram ||

mudākarāttamodakaṁ sadāvimuktisādhakaṁ
kalādharāvataṁsakaṁ vilāsilokarañjakam |
anāyakaikanāyakaṁ vināśitebhadaityakaṁ
natāśubhāśunāśakaṁ namāmi taṁ vināyakam ||1||

natetarātibhīkaraṁ navoditārkabhāsvaraṁ
namatsurārinirjaraṁ natādhikāpaduddharam |
sureśvaraṁ nidhīśvaraṁ gajeśvaraṁ gaṇeśvaraṁ
maheśvaraṁ tamāśraye parātparaṁ nirantaram ||2||

samastalokaśaṅkaraṁ nirastadaityakuñjaraṁ
daretarodaraṁ varaṁ varebhavaktramakṣaram |
kṛpākaraṁ kṣamākaraṁ mudākaraṁ yaśaskaraṁ
manaskaraṁ namaskṛtāṁ namaskaromi bhāsvaram ||3||

akiñcanārtimārjanaṁ cirantanoktibhājanaṁ
purāripūrvanandanaṁ surārigarvacarvaṇam |
prapañcanāśabhīṣaṇaṁ dhanañjayādibhūṣaṇaṁ
kapoladānavāraṇaṁ bhaje purāṇavāraṇam ||4||

nitāntakāntadantakāntimantakāntakātmajaṁ
acintyarūpamantahīnamantarāyakṛntanam |
hṛdantare nirantaraṁ vasantameva yogināṁ
tamekadantameva taṁ vicintayāmi santatam||5||

mahāgaṇeśpañcaratnamādareṇa yo'nvahaṁ
pragāyati prabhātake hṛdi smaran gaṇeśvaram |
arogatāmadoṣatāṁ susāhitīṁ suputratāṁ
samāhitāyuraṣṭabhūtimabhyupaiti so'cirāt ||6||

|| iti śrīmatparamahaṁsaparivrājakācāryasya śrīgovindabhagavatpūjyapādaśiṣyasya
śrīmacchaṅkarabhagavataḥ kṛtau śrīgaṇeśapañcaratnastotraṁ sampūrṇam ||

॥ शिवानन्द लहरी॥

कलाभ्यां चूडालङ्कृतशशिकलाभ्यां निजतपःफलाभ्यां भक्तेषु प्रकटितफलाभ्यां भवतु मे ।
शिवाभ्यामस्तोकत्रिभुवनशिवाभ्यां हृदि पुनर्भवाभ्यामानन्दस्फुरदनुभवाभ्यां नतिरियम्॥ १॥

गलन्ती शंभो त्वच्चरितसरितः किल्बिषरजो दलन्ती धीकुल्यासरणिषु पतन्ती विजयताम् ।
दिशन्ती संसारभ्रमणपरितापोपशमनं वसन्ती मच्चेतोहृदभुवि शिवानन्दलहरी॥ २॥

त्रयीवेद्यं हृद्यं त्रिपुरहरमाद्यं त्रिनयनं जटाभारोदारं चलदुरगहारं मृगधरम् ।
महादेवं देवं मयि सदयभावं पशुपतिं चिदालम्बं साम्बं शिवमतिविडम्बं हृदि भजे॥ ३॥

सहस्रं वर्तन्ते जगति विबुधाः क्षुद्रफलदा न मन्ये स्वप्ने वा तदनुसरणं तत्कृतफलम् ।
हरिब्रह्मादीनामपि निकटभाजामसुलभं चिरं याचे शंभो तव पदांभोजभजनम्॥ ४॥

स्मृतौ शास्त्रे वैद्ये शकुनकवितागानफणितौ पुराणे मन्त्रे वा स्तुतिनटनहास्येष्वचतुरः ।
कथं राज्ञां प्रीतिर्भवति मयि कोऽहं पशुपते पशुं मां सर्वज्ञ प्रथित कृपया पालय विभो॥ ५॥

घटो वा मृत्पिण्डोऽप्यणुरपि च धूमोऽग्निरचलः पटो वा तन्तुर्वा परिहरति किं घोरशमनम् ।
वृथा कण्ठक्षोभं वहसि तरसा तर्कवचसा पदाम्भोजं शंभोर्भज परमसौख्यं व्रज सुधीः॥ ६॥

मनस्ते पादाब्जे निवसतु वचः स्तोत्रफणितौ करौ चाभ्यर्चायां श्रुतिरपि कथाकर्णनविधौ ।
तव ध्याने बुद्धिर्नयनयुगलं मूर्तिविभवे परग्रन्थान् कैर्वा परमशिव जाने परमतः॥ ७॥

यथा बुद्धिः शुक्तौ रजतमिति काचाश्मनि मणिर्जले पैष्टे क्षीरं भवति मृगतृष्णासु सलिलम् ।
तथा देवभ्रान्त्या भजति भवदन्यं जडजनो महादेवेशं त्वां मनसि च न मत्वा पशुपते॥ ८॥

गभीरे कासारे विशति विजने घोरविपिने विशाले शैले च भ्रमति कुसुमार्थं जडमतिः ।
समर्प्यैकं चेतः सरसिजमुमानाथ भवते सुखेनावस्थातुं जन इह न जानाति किमहो॥ ९॥

नरत्वं देवत्वं नगवनमृगत्वं मशकता पशुत्वं कीटत्वं भवतु विहगत्वादि जननम् ।
सदा त्वत्पादाब्जस्मरणपरमानन्दलहरीविहारासक्तं चेद्धृदयमिह किं तेन वपुषा॥ १०॥

वटुर्वा गेही वा यतिरपि जटी वा तदितरो नरो वा यः कश्चिद्भवतु भव किं तेन भवति ।
यदीयं हृत्पद्मं यदि भवदधीनं पशुपते तदीयस्त्वं शंभो भवसि भवभारं च वहसि॥ ११॥

गुहायां गेहे वा बहिरपि वने वाऽद्रिशिखरे जले वा वह्नौ वा वसतु वसतेः किं वद फलम् ।
सदा यस्यैवान्तःकरणमपि शंभो तव पदे स्थितं चेद्योगोऽसौ स च परमयोगी स च सुखी॥ १२॥

|| śivānanda laharī ||

kalābhyāṁ cūḍālaṅkṛtaśaśikalābhyāṁ nijatapaḥ-
phalābhyāṁ bhakteṣu prakaṭitaphalābhyāṁ bhavatu me |
śivābhyāmastokatribhuvanaśivābhyāṁ hṛdi puna-
rbhavābhyāmānandasphuradanubhavābhyāṁ natiriyam ||1||

galantī śaṁbho tvaccaritasaritaḥ kilbiṣarajo
dalantī dhīkulyāsaraṇiṣu patantī vijayatām |
diśantī saṁsārabhramaṇaparitāpopaśamanaṁ
vasantī maccetohṛdabhuvi śivānandalaharī ||2||

trayīvedyaṁ hṛdyaṁ tripuraharamādyaṁ trinayanaṁ
jaṭābhārodāraṁ caladuragahāraṁ mṛgadharam |
mahādevaṁ devaṁ mayi sadayabhāvaṁ paśupatiṁ
cidālambaṁ sāmbaṁ śivamativiḍambaṁ hṛdi bhaje ||3||

sahasraṁ vartante jagati vibudhāḥ kṣudraphaladā
na manye svapne vā tadanusaraṇaṁ tatkṛtaphalam |
haribrahmādīnāmāpi nikaṭabhājāmasulabhaṁ
ciraṁ yāce śaṁbho tava padāṁbhojabhajanam ||4||

smṛtau śāstre vaidye śakunakavitāgānaphaṇitau
purāṇe mantre vā stutinaṭanahāsyeṣvacaturaḥ |
kathaṁ rājñāṁ prītirbhavati mayi ko'haṁ paśupate
paśuṁ māṁ sarvajña prathita kṛpayā pālaya vibho ||5||

ghaṭo vā mṛtpiṇḍo'pyaṇurapi ca dhūmo'gniracalaḥ
paṭo vā tanturvā pariharati kiṁ ghoraśamanam |
vṛthā kaṇṭhakṣobhaṁ vahasi tarasā tarkavacasā
padāmbhojaṁ śaṁbhorbhaja paramasaukhyaṁ vraja sudhīḥ ||6||

manaste pādābje nivasatu vacaḥ stotraphaṇitau
karau cābhyarcāyāṁ śrutirapi kathākarṇanavidhau |
tava dhyāne buddhirnayanayugalaṁ mūrtivibhave
paragranthān kairvā paramaśiva jāne paramataḥ ||7||

yathā buddhiḥ śuktau rajatamiti kācāśmani maṇi-
rjale paiṣṭe kṣīraṁ bhavati mṛgatṛṣṇāsu salilam |
tathā devabhrāntyā bhajati bhavadanyaṁ jaḍajano
mahādeveśaṁ tvāṁ manasi ca na matvā paśupate ||8||

gabhīre kāsāre viśati vijane ghoravipine
viśāle śaile ca bhramati kusumārthaṁ jaḍamatiḥ |
samarpyaikaṁ cetaḥ sarasijamumānātha bhavate
sukhenāvasthātuṁ jana iha na jānāti kimaho ||9||

naratvaṁ devatvaṁ nagavanamṛgatvaṁ maśakatā
paśutvaṁ kīṭatvaṁ bhavatu vihagatvādi jananam |
sadā tvatpādābjasmaraṇaparamānandalaharī-
vihārāsaktaṁ ceddhṛdayamiha kiṁ tena vapuṣā ||10||

vaṭurvā gehī vā yatirapi jaṭī vā taditaro
naro vā yaḥ kaścidbhavatu bhava kiṁ tena bhavati |
yadīyaṁ hṛtpadmaṁ yadi bhavadadhīnaṁ paśupate
tadīyastvaṁ śaṁbho bhavasi bhavabhāraṁ ca vahasi ||11||

guhāyāṁ gehe vā bahirapi vane vā'driśikhare
jale vā vahnau vā vasatu vasateḥ kiṁ vada phalam |
sadā yasyaivāntaḥkaraṇamapi śaṁbho tava pade
sthitaṁ cedyogo'sau sa ca paramayogī sa ca sukhī ||12||

असारे संसारे निजभजनदूरे जडधिया भ्रमन्तं मामन्धं परमकृपया पातुमुचितम् ।
मदन्यः को दीनस्तव कृपणरक्षातिनिपुणस्त्वदन्यः को वा मे त्रिजगति शरण्यः पशुपते॥ १३॥
प्रभुस्त्वं दीनानां खलु परमबन्धुः पशुपते प्रमुख्योऽहं तेषामपि किमुत बन्धुत्वमनयोः ।
त्वयैव क्षन्तव्याः शिव मदपराधाश्च सकलाः प्रयत्नात्कर्तव्यं मदवनमियं बन्धुसरणिः॥ १४॥
उपेक्षा नो चेत् किं न हरसि भवद्ध्यानविमुखां दुराशाभूयिष्ठां विधिलिपिमशक्तो यदि भवान् ।
शिरस्तद्वैधात्रं न नखलु सुवृत्तं पशुपते कथं वा निर्यत्नं करनखमुखेनैव लुलितम्॥ १५॥
विरिञ्चिर्दीर्घायुर्भवतु भवता तत्परशिरश्चतुष्कं संरक्ष्यं स खलु भुवि दैन्यं लिखितवान् ।
विचारः को वा मां विशद कृपया पाति शिव ते कटाक्षव्यापारः स्वयमपि च दीनावनपरः॥ १६॥
फलाद्वा पुण्यानां मयि करुणया वा त्वयि विभो प्रसन्नेऽपि स्वामिन् भवदमलपादाब्जयुगलम् ।
कथं पश्येयं मां स्थगयति नमः संभ्रमजुषां निलिम्पानां श्रोणिर्निजकनकमाणिक्यमकुटैः॥ १७॥
त्वमेको लोकानां परमफलदो दिव्यपदवीं वहन्तस्त्वन्मूलां पुनरपि भजन्ते हरिमुखाः ।
कियद्वा दाक्षिण्यं तव शिव मदाशा च कियती कदा वा मद्रक्षां वहसि करुणापूरितदृशा॥ १८॥
दुराशाभूयिष्ठे दुरधिपगृहद्वारघटके दुरन्ते संसारे दुरितनिलये दुःखजनके ।
मदायासं किं न व्यपनयसि कस्योपकृतये वदेयं प्रीतिश्चेत्तव शिव कृतार्थाः खलु वयम्॥ १९॥
सदा मोहाटव्यां चरति युवतीनां कुचगिरौ नटत्याशाशाखास्वटति झटिति स्वैरमभितः ।
कपालिन् भिक्षो मे हृदयकपिमत्यन्तचपलं दृढं भक्त्या बद्ध्वा शिव भवदधीनं कुरु विभो॥ २०॥
धृतिस्तंभाधारां दृढगुणनिबद्धां सगमनां विचित्रां पद्माढ्यां प्रतिदिवससन्मार्गघटिताम् ।
स्मरारे मच्चेतःस्फुटपटकुटीं प्राप्य विशदां जय स्वामिन् शक्त्या सह शिवगणैः सेवित विभो॥ २१॥
प्रलोभाद्यैरर्थाहरणपरतन्त्रो धनिगृहे प्रवेशोद्युक्तस्सन् भ्रमति बहुधा तस्करपते ।
इमं चेतश्चोरं कथमिह सहे शंकर विभो तवाधीनं कृत्वा मयि निरपराधे कुरु कृपाम्॥ २२॥
करोमि त्वत्पूजां सपदि सुखदो मे भव विभो विधित्वं विष्णुत्वं दिशसि खलु तस्याः फलमिति ।
पुनश्च त्वां द्रष्टुं दिवि भुवि वहन् पक्षिमृगतामदृष्ट्वा तत्खेदं कथमिह सहे शंकर विभो॥ २३॥
कदा वा कैलासे कनकमणिसौधे सहगणैर्वसन् शंभोरग्रे स्फुटघटितमूर्धाञ्जलिपुटः ।
विभो साम्ब स्वामिन् परमशिव पाहीति निगदन् विधातृणां कल्पान् क्षणमिव विनेष्यामि सुखतः॥ २४॥

asāre saṁsāre nijabhajanadūre jaḍadhiyā
bhramantaṁ māmandhaṁ paramakṛpayā pātumucitam |
madanyaḥ ko dīnastava kṛpaṇarakṣātinipuṇa-
stvadanyaḥ ko vā me trijagati śaraṇyaḥ paśupate ||13||

prabhustvaṁ dīnānāṁ khalu paramabandhuḥ paśupate
pramukhyo'haṁ teṣāmapi kimuta bandhutvamanayoḥ |
tvayaiva kṣantavyāḥ śiva madaparādhāśca sakalāḥ
prayatnātkartavyaṁ madavanamiyaṁ bandhusaraṇiḥ ||14||

upekṣā no cet kiṁ na harasi bhavaddhyānavimukhāṁ
durāśābhūyiṣṭhāṁ vidhilipimaśakto yadi bhavān |
śirastadvaidhātraṁ na nakhalu suvṛttaṁ paśupate
kathaṁ vā niryatnaṁ karanakhamukhenaiva lulitam ||15||

viriñcirdīrghāyurbhavatu bhavatā tatparaśira-
ścatuṣkaṁ saṁrakṣyaṁ sa khalu bhuvi dainyaṁ likhitavān |
vicāraḥ ko vā māṁ viśada kṛpayā pāti śiva te
kaṭākṣavyāpāraḥ svayamapi ca dīnāvanaparaḥ ||16||

phalādvā puṇyānāṁ mayi karuṇayā vā tvayi vibho
prasanne'pi svāmin bhavadamalapādābjayugalam |
kathaṁ paśyeyaṁ māṁ sthagayati namaḥ saṁbhramajuṣāṁ
nilimpānāṁ śroṇirnijakanakamāṇikyamakuṭaiḥ ||17||

tvameko lokānāṁ paramaphalado divyapadavīṁ
vahantastvanmūlāṁ punarapi bhajante harimukhāḥ |
kiyadvā dākṣiṇyaṁ tava śiva madāśā ca kiyatī
kadā vā madrakṣāṁ vahasi karuṇāpūritadṛśā ||18||

durāśābhūyiṣṭhe duradhipagṛhadvāraghaṭake
durante saṁsāre duritanilaye duḥkhajanake |
madāyāsaṁ kiṁ na vyapanayasi kasyopakṛtaye
vadeyaṁ prītiścettava śiva kṛtārthāḥ khalu vayam ||19||

sadā mohāṭavyāṁ carati yuvatīnāṁ kucagirau
naṭatyāśāśākhāsvaṭati jhaṭiti svairamabhitaḥ |
kapālin bhikṣo me hṛdayakapimatyantacapalaṁ
dṛḍhaṁ bhaktyā baddhvā śiva bhavadadhīnaṁ kuru vibho ||20||

dhṛtistaṁbhādhārāṁ dṛḍhaguṇanibaddhāṁ sagamanāṁ
vicitrāṁ padmāḍhyāṁ pratidivasasanmārgaghaṭitām |
smarāre maccetaḥsphuṭapaṭakuṭīṁ prāpya viśadāṁ
jaya svāmin śaktyā saha śivagaṇaiḥ sevita vibho ||21||

pralobhādyairarthāharaṇaparatantro dhanigṛhe
praveśodyuktassan bhramati bahudhā taskarapate |
imaṁ cetaścoraṁ kathamiha sahe śaṁkara vibho
tavādhīnaṁ kṛtvā mayi niraparādhe kuru kṛpām ||22||

karomi tvatpūjāṁ sapadi sukhado me bhava vibho
vidhitvaṁ viṣṇutvaṁ diśasi khalu tasyāḥ phalamiti |
punaśca tvāṁ draṣṭuṁ divi bhuvi vahan pakṣimṛgatā-
madṛṣṭvā tatkhedaṁ kathamiha sahe śaṁkara vibho ||23||

kadā vā kailāse kanakamaṇisaudhe sahagaṇai-
rvasan śaṁbhoragre sphuṭaghaṭitamūrdhāñjalipuṭaḥ |
vibho sāmba svāmin paramaśiva pāhīti nigadan
vidhātṝṇāṁ kalpān kṣaṇamiva vineṣyāmi sukhataḥ ||24||

स्तवैर्ब्रह्मादीनां जयजयवचोभिर्नियमिनां गणानां केलीभिर्मदकलमहोक्षस्य ककुदि ।
स्थितं नीलग्रीवं त्रिनयनमुमाश्लिष्टवपुषं कदा त्वां पश्येयं करधृतमृगं खण्डपरशुम्॥ २५॥
कदा वा त्वां दृष्ट्वा गिरिश तव भव्याङ्घ्रियुगलं गृहीत्वा हस्ताभ्यां शिरसि नयने वक्षसि वहन् ।
समाश्लिष्याघ्राय स्फुटजलजगन्धान् परिमलानलाभ्यां ब्रह्माद्यैर्मुदमनुभविष्यामि हृदये॥ २६ ॥
करस्थे हेमाद्रौ गिरिश निकटस्थे धनपतौ गृहस्थे स्वर्भूजाऽमरसुरभिचिन्तामणिगणे ।
शिरस्थे शीतांशौ चरणयुगलस्थेऽखिलशुभे कमर्थं दास्येऽहं भवतु भवदर्थं मम मनः॥ २७॥
सारूप्यं तव पूजने शिव महादेवेति संकीर्तने सामीप्यं शिवभक्तिधुर्यजनतासांगत्यसंभाषणे ।
सालोक्यं च चराचरात्मकतनुध्याने भवानीपते सायुज्यं मम सिद्धमत्र भवति स्वामिन् कृतार्थोऽस्म्यहम्॥ २८॥
त्वत्पादाम्बुजमर्चयामि परमं त्वां चिन्तयाम्यन्वहं त्वामीशं शरणं व्रजामि वचसा त्वामेव याचे विभो ।
वीक्षां मे दिश चाक्षुषीं सकरुणां दिव्यैश्चिरं प्रार्थितां शंभो लोकगुरो मदीयमनसः सौख्योपदेशं कुरु॥ २९ ॥
वस्त्रोद्धूतविधौ सहस्रकरता पुष्पार्चने विष्णुता गन्धे गन्धवहात्मताऽन्नपचने बर्हिर्मुखाध्यक्षता ।
पात्रे काञ्चनगर्भतास्ति मयि चेद् बालेन्दुचूडामणे शुश्रूषां करवाणि ते पशुपते स्वामिन् त्रिलोकीगुरो॥ ३० ॥
नालं वा परमोपकारकमिदं त्वेकं पशूनां पते पश्यन् कुक्षिगतान् चराचरगणान् बाह्यस्थितान् रक्षितुम् ।
सर्वामर्त्यपलायनौषधमतिज्वालाकरं भीकरं निक्षिप्तं गरलं गले न गिलितं नोद्गीर्णमेव त्वया॥ ३१ ॥
ज्वालोग्रः सकलामरातिभयदः क्ष्वेलः कथं वा त्वया दृष्टः किं च करे धृतः करतले किं पक्वजंबूफलम् ।
जिह्वायां निहितश्च सिद्धघुटिका वा कण्ठदेशे भृतः किं ते नीलमणिर्विभूषणमयं शंभो महात्मन् वद॥ ३२ ॥
नालं वा सकृदेव देव भवतः सेवा नतिर्वा नुतिः पूजा वा स्मरणं कथाश्रवणमप्यालोकनं मादृशाम् ।
स्वामिन्नस्थिरदेवतानुसरणायासेन किं लभ्यते का वा मुक्तिरितः कुतो भवति चेत् किं प्रार्थनीयं तदा॥ ३३ ॥
किं ब्रूमस्तव साहसं पशुपते कस्यास्ति शंभो भवद्धैर्यं चेदृशमात्मनः स्थितिरियं चान्यैः कथं लभ्यते ।
भ्रश्यद्देवगणं त्रसन्मुनिगणं नश्यत्प्रपञ्चं लयं पश्यन्निर्भय एक एव विहरत्यानन्दसान्द्रो भवान्॥ ३४॥
योगक्षेमधुरंधरस्य सकलश्रेयःप्रदोद्योगिनो दृष्टादृष्टमतोपदेशकृतिनो बाह्यान्तरव्यापिनः ।
सर्वज्ञस्य दयाकरस्य भवतः किं वेदितव्यं मया शंभो त्वं परमान्तरङ्ग इति मे चित्ते स्मराम्यन्वहम्॥ ३५॥
भक्तो भक्तिगुणावृते मुदमृतापूर्णे प्रसन्ने मनः कुम्भे साम्ब तवाङ्घ्रिपल्लवयुगं संस्थाप्य संवित्फलम् ।
सत्वं मन्त्रमुदीरयन्निजशरीरागारशुद्धिं वहन् पुण्याहं प्रकटीकरोमि रुचिरं कल्याणमापादयन्॥ ३६ ॥

nālaṁ vā paramopakārakamidaṁ tvekaṁ paśūnāṁ pate
stavairbrahmādīnāṁ jayajayavacobhirniyamināṁ
gaṇānāṁ kelībhirmadakalamahokṣasya kakudi |
sthitaṁ nīlagrīvaṁ trinayanamumāśliṣṭavapuṣaṁ
kadā tvāṁ paśyeyaṁ karadhṛtamṛgaṁ khaṇḍaparaśum ||25||

kadā vā tvāṁ dṛṣṭvā giriśa tava bhavyāṅghriyugalaṁ
gṛhītvā hastābhyāṁ śirasi nayane vakṣasi vahan |
samāśliṣyāghrāya sphuṭajalajagandhān parimalā-
nalābhyāṁ brahmādyairmudamanubhaviṣyāmi hṛdaye ||26||

karasthe hemādrau giriśa nikaṭasthe dhanapatau
gṛhasthe svarbhūjā'marasurabhicintāmaṇigaṇe |
śirasthe śītāṁśau caraṇayugalasthe'khilaśubhe
kamarthaṁ dāsye'haṁ bhavatu bhavadarthaṁ mama manaḥ ||27||

sārūpyaṁ tava pūjane śiva mahādeveti saṁkīrtane
sāmīpyaṁ śivabhaktidhuryajanatāsāṁgatyasaṁbhāṣaṇe |
sālokyaṁ ca carācarātmakatanudhyāne bhavānīpate
sāyujyaṁ mama siddhamatra bhavati svāmin kṛtārtho'smyaham ||28||

tvatpādāmbujamarcayāmi paramaṁ tvāṁ cintayāmyanvahaṁ
tvāmīśaṁ śaraṇaṁ vrajāmi vacasā tvāmeva yāce vibho |
vīkṣāṁ me diśa cākṣuṣīṁ sakaruṇāṁ divyaiściraṁ prārthitāṁ
śaṁbho lokaguro madīyamanasaḥ saukhyopadeśaṁ kuru ||29||

vastroddhūtavidhau sahasrakaratā puṣpārcane viṣṇutā
gandhe gandhavahātmatā'nnapacane barhirmukhādhyakṣatā |
pātre kāñcanagarbhatāsti mayi ced bālenducūḍāmaṇe
śuśrūṣāṁ karavāṇi te paśupate svāmin trilokīguro ||30||

paśyan kukṣigatān carācaragaṇān bāhyasthitān rakṣitum |
sarvāmartyapalāyanauṣadhamatijvālākaraṁ bhīkaraṁ
nikṣiptaṁ garalaṁ gale na gilitaṁ nodgīrṇameva tvayā ||31||

jvālograḥ sakalāmarātibhayadaḥ kṣvelaḥ kathaṁ vā tvayā
dṛṣṭaḥ kiṁ ca kare dhṛtaḥ karatale kiṁ pakvajaṁbūphalam |
jihvāyāṁ nihitaśca siddhaghuṭikā vā kaṇṭhadeśe bhṛtaḥ
kiṁ te nīlamaṇirvibhūṣaṇamayaṁ śaṁbho mahātman vada ||32||

nālaṁ vā sakṛdeva deva bhavataḥ sevā natirvā nutiḥ
pūjā vā smaraṇaṁ kathāśravaṇamapyālokanaṁ mādṛśām |
svāminnasthiradevatānusaraṇāyāsena kiṁ labhyate
kā vā muktiritaḥ kuto bhavati cet kiṁ prārthanīyaṁ tadā ||33||

kiṁ brūmastava sāhasaṁ paśupate kasyāsti śaṁbho bhava-
ddhairyaṁ cedṛśamātmanaḥ sthitiriyaṁ cānyaiḥ kathaṁ labhyate |
bhraśyaddevagaṇaṁ trasanmunigaṇaṁ naśyatprapañcaṁ layaṁ
paśyannirbhaya eka eva viharatyānandasāndro bhavān ||34||

yogakṣemadhuraṁdharasya sakalaśreyaḥpradodyogino
dṛṣṭādṛṣṭamatopadeśakṛtino bāhyāntaravyāpinaḥ |
sarvajñasya dayākarasya bhavataḥ kiṁ veditavyaṁ mayā
śaṁbho tvaṁ paramāntaraṅga iti me citte smarāmyanvaham ||35||

bhakto bhaktiguṇāvṛte mudamṛtāpūrṇe prasanne manaḥ
kumbhe sāmba tavāṅghripallavayugaṁ saṁsthāpya saṁvitphalam |
satvaṁ mantramudīrayannijaśarīrāgāraśuddhiṁ vahan
puṇyāhaṁ prakaṭīkaromi ruciraṁ kalyāṇamāpādayan ||36||

आम्नायाम्बुधिमादरेण सुमनस्संघाः समुद्यन्मनो मन्थानं दृढभक्तिरज्जुसहितं कृत्वा मथित्वा ततः ।
सोमं कल्पतरुं सुपर्वसुरभिं चिन्तामणिं धीमतां नित्यानन्दसुधां निरन्तररमासौभाग्यमातन्वते॥३७॥
प्राक्पुण्याचलमार्गदर्शितसुधामूर्तिःप्रसन्नः शिवः सोमः सद्गुणसेवितो मृगधरः पूर्णस्तमोमोचकः ।
चेतः पुष्करलक्षितो भवति चेदानन्दपाथोनिधिः प्रागल्भ्येन विजृम्भते सुमनसां वृत्तिस्तदा जायते॥३८॥
धर्मो मे चतुरङ्घ्रिकः सुचरितः पापं विनाशं गतं कामक्रोधमदादयो विगलिताः कालाः सुखाविष्कृताः ।
ज्ञानानन्दमहौषधिः सुफलिता कैवल्यनाथे सदा मान्ये मानसपुण्डरीकनगरे राजावतंसे स्थिते॥३९॥
धीयन्त्रेण वचोघटेन कविताकुल्योपकुल्याक्रमैरानीतैश्च सदाशिवस्य चरिताम्भोराशिदिव्यामृतैः।
हृत्केदारयुताश्च भक्तिकलमाः साफल्यमातन्वते दुर्भिक्षान् मम सेवकस्य भगवन् विश्वेश भीतिः कुतः॥४०॥
पापोत्पातविमोचनाय रुचिरैश्वर्याय मृत्युंजय स्तोत्रध्याननतिप्रदक्षिणसपर्यालोकनाकर्णने ।
जिह्वाचित्तशिरोङ्घ्रिहस्तनयनश्रोत्रैरहं प्रार्थितो मामाज्ञापय तन्निरूपय मुहुर्मामेव मा मेऽवचः॥४१॥
गाम्भीर्यं परिखापदं घनधृतिः प्राकार उद्यद्गुणस्तोमश्चाप्तबलं घनेन्द्रियचयो द्वाराणि देहे स्थितः।
विद्यावस्तुसमृद्धिरित्यखिलसामग्रीसमेते सदा दुर्गातिप्रियदेव मामकमनोदुर्गे निवासं कुरु॥४२॥
मा गच्छ त्वमितस्ततो गिरिश भो मय्येव वासं कुरु स्वामिन्नादिकिरात मामकमनःकान्तारसीमान्तरे ।
वर्तन्ते बहुशो मृगा मदजुषो मात्सर्यमोहादयस्तान् हत्वा मृगयाविनोदरुचितालाभं च संप्राप्स्यसि॥४३॥
करलग्नमृगः करीन्द्रभङ्गो घनशार्दूलविखण्डनोऽस्तजन्तुः ।
गिरिशो विशदाकृतिश्च चेतः कुहरे पञ्चमुखोस्ति मे कुतो भीः॥४४॥
छन्दःशाखिशिखान्वितैर्द्विजवरैः संसेविते शाश्वते सौख्यापादिनि खेदभेदिनि सुधासारैः फलैर्दीपिते ।
चेतःपक्षिशिखामणे त्यज वृथासंचारमन्यैरलं नित्यं शंकरपादपद्मयुगलीनीडे विहारं कुरु॥४५॥
आकीर्णे नखराजिकान्तिविभवैरुद्यत्सुधावैभवैराधौतेपि च पद्मरागललिते हंसव्रजैराश्रिते।
नित्यं भक्तिवधूगणैश्च रहसि स्वेच्छाविहारं कुरु स्थित्वा मानसराजहंस गिरिजानाथाङ्घ्रिसौधान्तरे॥४६॥
शंभुध्यानवसन्तसंगिनि हृदारामेऽघजीर्णच्छदाः स्रस्ता भक्तिलताच्छटा विलसिताः पुण्यप्रवालश्रिताः ।
दीप्यन्ते गुणकोरका जपवचःपुष्पाणि सद्वासना ज्ञानानन्दसुधामरन्दलहरी संवित्फलाभ्युन्नतिः॥४७॥
नित्यानन्दरसालयं सुरमुनिस्वान्ताम्बुजाताश्रयं स्वच्छं सद्द्विजसेवितं कलुषहृत्सद्वासनाविष्कृतम्।
शंभुध्यानसरोवरं व्रज मनो हंसावतंस स्थिरं किं क्षुद्राश्रयपल्वलभ्रमणसंजातश्रमं प्राप्स्यसि॥४८॥

āmnāyāmbudhimādareṇa sumanassaṁghāḥ samudyanmano
manthānaṁ dṛḍhabhaktirajjusahitaṁ kṛtvā mathitvā tataḥ |
somaṁ kalpataruṁ suparvasurabhiṁ cintāmaṇiṁ dhīmatāṁ
nityānandasudhāṁ nirantararamāsaubhāgyamātanvate ||37||

prākpuṇyācalamārgadarśitasudhāmūrtiḥprasannaḥ śivaḥ
somaḥ sadguṇasevito mṛgadharaḥ pūrṇastamomocakaḥ |
cetaḥ puṣkaralakṣito bhavati cedānandapāthonidhiḥ
prāgalbhyena vijṛmbhate sumanasāṁ vṛttistadā jāyate ||38||

dharmo me caturaṅghrikaḥ sucaritaḥ pāpaṁ vināśaṁ gataṁ
kāmakrodhamadādayo vigalitāḥ kālāḥ sukhāviṣkṛtāḥ |
jñānānandamahauṣadhiḥ suphalitā kaivalyanāthe sadā
mānye mānasapuṇḍarīkanagare rājāvataṁse sthite ||39||

dhīyantreṇa vacoghaṭena kavitākulyopakulyākramai-
rānītaiśca sadāśivasya caritāmbhorāśidivyāmṛtaiḥ |
hṛtkedārayutāśca bhaktikalamāḥ sāphalyamātanvate
durbhikṣān mama sevakasya bhagavan viśveśa bhītiḥ kutaḥ ||40||

pāpotpātavimocanāya ruciraiśvaryāya mṛtyuṁjaya
stotradhyānanatipradakṣiṇasaparyālokanākarṇane |
jihvācittaśiroṅghrihastanayanaśrotrairahaṁ prārthito
māmājñāpaya tannirūpaya muhurmāmeva mā me'vacaḥ ||41||

gāmbhīryaṁ parikhāpadaṁ ghanadhṛtiḥ prākāra udyadguṇa-
stomaścāptabalaṁ ghanendriyacayo dvārāṇi dehe sthitaḥ |
vidyāvastusamṛddhirityakhilasāmagrīsamete sadā
durgātipriyadeva māmakamanodurge nivāsaṁ kuru ||42||

mā gaccha tvamitastato giriśa bho mayyeva vāsaṁ kuru
svāminnādikirāta māmakamanaḥkāntārasīmāntare |
vartante bahuśo mṛgā madajuṣo mātsaryamohādaya-
stān hatvā mṛgayāvinodarucitālābhaṁ ca saṁprāpsyasi ||43||

karalagnamṛgaḥ karīndrabhaṅgo ghanaśārdūlavikhaṇḍano'stajantuḥ |
giriśo viśadākṛtiśca cetaḥ kuhare pañcamukhosti me kuto bhīḥ ||44||

chandaḥśākhiśikhānvitairdvijavaraiḥ saṁsevite śāśvate
saukhyāpādini khedabhedini sudhāsāraiḥ phalairdīpite |
cetaḥpakṣiśikhāmaṇe tyaja vṛthāsaṁcāramanyairalaṁ
nityaṁ śaṁkarapādapadmayugalīnīḍe vihāraṁ kuru ||45||

ākīrṇe nakharājikāntivibhavairudyatsudhāvaibhavai-
rādhautepi ca padmarāgalalite haṁsavrajairāśrite |
nityaṁ bhaktivadhūgaṇaiśca rahasi svecchāvihāraṁ kuru
sthitvā mānasarājahaṁsa girijānāthāṅghrisaudhāntare ||46||

śaṁbhudhyānavasantasaṁgini hṛdārāme'ghajīrṇacchadāḥ
srastā bhaktilatācchaṭā vilasitāḥ puṇyapravālaśritāḥ |
dīpyante guṇakorakā japavacaḥpuṣpāṇi sadvāsanā
jñānānandasudhāmarandalaharī saṁvitphalābhyunnatiḥ ||47||

nityānandarasālayaṁ suramunisvāntāmbujātāśrayaṁ
svacchaṁ saddvijasevitaṁ kaluṣahṛtsadvāsanāviṣkṛtam |
śaṁbhudhyānasarovaraṁ vraja mano haṁsāvataṁsa sthiraṁ
kiṁ kṣudrāśrayapalvalabhramaṇasaṁjātaśramaṁ prāpsyasi ||48||

आनन्दामृतपूरिता हरपदाम्भोजालवालोद्यता स्थैर्योपघ्नमुपेत्य भक्तिलतिका शाखोपशाखान्विता ।
उच्चैर्मानसकायमानपटलीमाक्रम्य निष्कल्मषा नित्याभीष्टफलप्रदा भवतु मे सत्कर्मसंवर्धिता॥४९॥
सन्ध्यारंभविजृम्भितं श्रुतिशिरस्थानान्तराधिष्ठितं सप्रेमभ्रमराभिराममसकृत् सद्वासनाशोभितम् ।
भोगीन्द्राभरणं समस्तसुमनःपूज्यं गुणाविष्कृतं सेवे श्रीगिरिमल्लिकार्जुनमहालिङ्गं शिवालिङ्गितं॥५०॥
भृंगीच्छानटनोत्कटः करमदिग्राही स्फुरन्माधवाह्लादो नादयुतो महासितवपुः पञ्चेषुणा चादृतः ।
सत्पक्षः सुमनोवनेषु स पुनः साक्षान्मदीये मनोराजीवे भ्रमराधिपो विहरतां श्रीशैलवासी विभु॥५१॥
कारुण्यामृतवर्षिणं घनविपद्ग्रीष्मच्छिदाकर्मठं विद्यासस्यफलोदयाय सुमनःसंसेव्यमिच्छाकृतिम् ।
नृत्यद्भक्तमयूरमद्रिनिलयं चञ्चज्जटामण्डलं शंभो वाञ्छति नीलकन्धर सदा त्वां मे मनश्चातकः॥५२॥
आकाशेन शिखी समस्तफणिनां नेत्रा कलापी नताऽनुग्राहिप्रणवोपदेशनिनदैः केकीति यो गीयते ।
श्यामां शैलसमुद्भवां घनरुचिं दृष्ट्वा नटन्तं मुदा वेदान्तोपवने विहाररसिकं तं नीलकण्ठं भजे॥५३॥
सन्ध्याघर्मदिनात्ययो हरिकराघातप्रभूतानकध्वानो वारिदगर्जितं दिविषदां दृष्टिच्छटा चञ्चला ।
भक्तानां परितोषबाष्पविततिर्वृष्टिर्मयूरी शिवा यस्मिन्नुज्ज्वलताण्डवं विजयते तं नीलकण्ठं भजे॥५४॥
आद्यायामिततेजसे श्रुतिपदैर्वेद्याय साध्याय ते विद्यानन्दमयात्मने त्रिजगतः संरक्षणोद्योगिने ।
ध्येयायाखिलयोगिभिः सुरगणैर्गेयाय मायाविने सम्यक्ताण्डवसंभ्रमाय जटिने सेयं नतिः शंभवे॥५५॥
नित्याय त्रिगुणात्मने पुरजिते कात्यायनीश्रेयसे सत्यायादिकुटुम्बिने मुनिमनः प्रत्यक्षचिन्मूर्तये ।
मायासृष्टजगत्त्रयाय सकलाम्नायान्तसंचारिणे सायं ताण्डवसंभ्रमाय जटिने सेयं नतिः शंभवे॥५६॥
नित्यं स्वोदरपोषणाय सकलानुद्दिश्य वित्ताशया व्यर्थं पर्यटनं करोमि भवतः सेवां न जाने विभो ।
मज्जन्मान्तरपुण्यपाकबलतस्त्वं शर्व सर्वान्तरस्तिष्ठस्येव हि तेन वा पशुपते ते रक्षनीयोऽस्म्यहम्॥५७॥
एको वारिजबान्धवः क्षितिनभो व्याप्तं तमोमण्डलं भित्वा लोचनगोचरोऽपि भवति त्वं कोटिसूर्यप्रभः ।
वेद्यः किन्न भवस्यहो घनतरं कीदृग्भवेन्मत्तमस्तत्सर्वं व्यपनीय मे पशुपते साक्षात् प्रसन्नो भव॥५८॥
हंसः पद्मवनं समिच्छति यथा नीलाम्बुदं चातकः कोकः कोकनदप्रियं प्रतिदिनं चन्द्रं चकोरस्तथा ।
चेतो वाञ्छति मामकं पशुपते चिन्मार्गमृग्यं विभो गौरीनाथ भवत्पदाब्जयुगलं कैवल्यसौख्यप्रदम्॥५९॥
रोधस्तोयहृतः श्रमेण पथिकश्छायां तरोर्वृष्टितो भीतः स्वस्थगृहं गृहस्थमतिथिर्दीनः प्रभुं धार्मिकम् ।
दीपं सन्तमसाकुलश्च शिखिनं शीतावृतस्त्वं तथा चेतः सर्वभयापहं व्रज सुखं शंभोः पदाम्भोरुहम्॥६०॥

ānandāmṛtapūritā harapadāmbhojālavālodyatā
sthairyopaghnamupetya bhaktilatikā śākhopaśākhānvitā |
ucchairmānasakāyamānapaṭalīmākramya niṣkalmaṣā
nityābhīṣṭaphalapradā bhavatu me satkarmasaṁvardhitā ||49||

sandhyāraṁbhavijṛmbhitaṁ śrutiśirasthānāntarādhiṣṭhitaṁ
sapremabhramarābhirāmamasakṛt sadvāsanāśobhitam |
bhogīndrābharaṇaṁ samastasumanaḥpūjyaṁ guṇāviṣkṛtaṁ
seve śrīgirimallikārjunamahāliṅgaṁ śivāliṅgitaṁ ||50||

bhṛṁgīcchānaṭanotkaṭaḥ karamadigrāhī sphuranmādhavā-
hlādo nādayuto mahāsitavapuḥ pañceṣuṇā cādṛtaḥ |
satpakṣaḥ sumanovaneṣu sa punaḥ sākṣānmadīye mano-
rājīve bhramarādhipo viharatāṁ śrīśailavāsī vibhu ||51||

kāruṇyāmṛtavarṣiṇaṁ ghanavipadgrīṣmacchidākarmaṭhaṁ
vidyāsasyaphalodayāya sumanaḥsaṁsevyamicchākṛtim |
nṛtyadbhaktamayūramadrinilayaṁ cañcajjaṭāmaṇḍalaṁ
śaṁbho vāñchati nīlakandhara sadā tvāṁ me manaścātakaḥ ||52||

ākāśena śikhī samastaphaṇināṁ netrā kalāpī natā-
'nugrāhipraṇavopadeśaninadaiḥ kekīti yo gīyate |
śyāmāṁ śailasamudbhavāṁ ghanaruciṁ dṛṣṭvā naṭantaṁ mudā
vedāntopavane vihārarasikaṁ taṁ nīlakaṇṭhaṁ bhaje ||53||

sandhyāgharmadinātyayo harikarāghātaprabhūtānaka-
dhvāno vāridagarjitaṁ diviṣadāṁ dṛṣṭicchaṭā cañcalā |
bhaktānāṁ paritoṣabāṣpavitatirvṛṣṭirmayūrī śivā
yasminnujjvalatāṇḍavaṁ vijayate taṁ nīlakaṇṭhaṁ bhaje ||54||

ādyāyāmitatejase śrutipadairvedyāya sādhyāya te
vidyānandamayātmane trijagataḥ saṁrakṣaṇodyogine |
dhyeyāyākhilayogibhiḥ suragaṇairgeyāya māyāvine
samyaktāṇḍavasaṁbhramāya jaṭine seyaṁ natiḥ śaṁbhave ||55||

nityāya triguṇātmane purajite kātyāyanīśreyase
satyāyādikuṭumbine munimanaḥ pratyakṣacinmūrtaye |
māyāsṛṣṭajagattrayāya sakalāmnāyāntasaṁcāriṇe
sāyaṁ tāṇḍavasaṁbhramāya jaṭine seyaṁ natiḥ śaṁbhave ||56||

nityaṁ svodarapoṣaṇāya sakalānuddiśya vittāśayā
vyarthaṁ paryaṭanaṁ karomi bhavataḥ sevāṁ na jāne vibho |
majjanmāntarapuṇyapākabalatastvaṁ śarva sarvāntara-
stiṣṭhasyeva hi tena vā paśupate te rakṣanīyo'smyaham ||57||

eko vārijabāndhavaḥ kṣitinabho vyāptaṁ tamomaṇḍalaṁ
bhitvā locanagocaro'pi bhavati tvaṁ koṭisūryaprabhaḥ |
vedyaḥ kinna bhavasyaho ghanataraṁ kīdṛgbhavenmattama-
statsarvaṁ vyapanīya me paśupate sākṣāt prasanno bhava ||58||

haṁsaḥ padmavanaṁ samicchati yathā nīlāmbudaṁ cātakaḥ
kokaḥ kokanadapriyaṁ pratidinaṁ candraṁ cakorastathā |
ceto vāñchati māmakaṁ paśupate cinmārgamṛgyaṁ vibho
gaurīnātha bhavatpadābjayugalaṁ kaivalyasaukhyapradam ||59||

rodhastoyahṛtaḥ śrameṇa pathikaśchāyāṁ tarorvṛṣṭito
bhītaḥ svasthagṛhaṁ gṛhasthamatithirdīnaḥ prabhuṁ dhārmikam |
dīpaṁ santamasākulaśca śikhinaṁ śītāvṛtastvaṁ tathā
cetaḥ sarvabhayāpahaṁ vraja sukhaṁ śaṁbhoḥ padāmbhoruham ||60||

अङ्कोलं निजबीजसन्ततिरयस्कान्तोपलं सूचिका साध्वी नैजविभुं लता क्षितिरुहं सिन्धुः सरिद्वल्लभम् ।
प्राप्नोतीह यथा तथा पशुपतेः पादारविन्दद्वयं चेतोवृत्तिरुपेत्य तिष्ठति सदा सा भक्तिरित्युच्यते॥ ६१ ॥
आनन्दाश्रुभिरातनोति पुलकं नैर्मल्यतच्छादनं वाचा शङ्खमुखे स्थितैश्च जठरापूर्तिं चरित्रामृतैः ।
रुद्राक्षैर्भसितेन देव वपुषो रक्षां भवद्भावनापर्यङ्के विनिवेश्य भक्तिजननी भक्तार्भकं रक्षति॥ ६२॥
मार्गावर्तितपादुका पशुपतेरङ्गस्य कूर्चायते गण्डूषांबुनिषेचनं पुररिपोर्दिव्याभिषेकायते ।
किंचिद्भक्षितमांसशेषकबलं नव्योपहारायते भक्तिः किं न करोत्यहो वनचरो भक्तावतंसायते॥ ६३ ॥
वक्षस्ताडनमन्तकस्य कठिनापस्मारसंमर्दनं भूभृत्पर्यटनं नमस्सुरशिरःकोटीरसंघर्षणम् ।
कर्मेदं मृदुलस्य तावकपदद्वन्द्वस्य गौरीपते मच्चेतोमणिपादुकाविहरणं शंभो सदाङ्गीकुरु॥ ६४॥
वक्षस्ताडनशङ्कया विचलितो वैवस्वतो निर्जराः कोटीरोज्ज्वलरत्नदीपकलिकानीराजनं कुर्वते ।
दृष्ट्वा मुक्तिवधूस्तनोति निभृताश्लेषं भवानीपते यच्चेतस्तव पादपद्मभजनं तस्येह किं दुर्लभम्॥ ६५॥
क्रीडार्थं सृजसि प्रपञ्चमखिलं क्रीडामृगास्ते जनाः यत्कर्माचरितं मया च भवतः प्रीत्यै भवत्येव तत् ।
शंभो स्वस्य कुतूहलस्य करणं मच्चेष्टितं निश्चितं तस्मान्मामकरक्षणं पशुपते कर्तव्यमेव त्वया॥ ६६ ॥
बहुविधपरितोषबाष्पपूरस्फुटपुलकाङ्कितचारुभोगभूमिम् ।
चिरपदफलकाङ्क्षिसेव्यमानां परमसदाशिवभावनां प्रपद्ये॥ ६७॥
अमितमुदमृतं मुहुर्दुहन्तीं विमलभवत्पदगोष्ठमावसन्तीम् ।
सदय पशुपते सुपुण्यपाकां मम परिपालय भक्तिधेनुमेकाम्॥ ६८॥
जडता पशुता कलङ्किता कुटिलचरत्वं च नास्ति मयि देव ।
अस्ति यदि राजमौले भवदाभरणस्य नास्मि किं पात्रम्॥ ६९॥
अरहसि रहसि स्वतन्त्रबुद्ध्या वरिवसितुं सुलभः प्रसन्नमूर्तिः ।
अगणितफलदायकः प्रभुर्मे जगदधिको हृदि राजशेखरोऽस्ति॥ ७०॥
आरूढभक्तिगुणकुञ्चितभावचापयुक्तैः शिवस्मरणबाणगणैरमोघैः ।
निर्जित्य किल्बिषरिपून् विजयी सुधीन्द्रः सानन्दमावहति सुस्थिरराजलक्ष्मीम्॥ ७१ ॥
ध्यानाञ्जनेन समवेक्ष्य तमःप्रदेशं भित्वा महाबलिभिरीश्वरनाममन्त्रैः ।
दिव्याश्रितं भुजगभूषणमुद्वहन्ति ये पादपद्ममिह ते शिव ते कृतार्थाः॥ ७२॥
भूदारतामुदवहद्यदपेक्षया श्रीभूदार एव किमतः सुमते लभस्व ।
केदारमाकलितमुक्तिमहौषधीनां पादारविन्दभजनं परमेश्वरस्य॥ ७३॥

aṅkolaṁ nijabījasantatirayaskāntopalaṁ sūcikā
sādhvī naijavibhuṁ latā kṣitiruhaṁ sindhuḥ saridvallabham |
prāpnotīha yathā tathā paśupateḥ pādāravindadvayaṁ
cetovṛttirupetya tiṣṭhati sadā sā bhaktirityucyate ||61||

ānandāśrubhirātanoti pulakaṁ nairmalyatacchādanaṁ
vācā śaṅkhamukhe sthitaiśca jaṭharāpūrtiṁ caritrāmṛtaiḥ |
rudrākṣairbhasitena deva vapuṣo rakṣāṁ bhavadbhāvanā-
paryaṅke viniveśya bhaktijananī bhaktārbhakaṁ rakṣati ||62||

mārgāvartitapādukā paśupateraṅgasya kūrcāyate
gaṇḍūṣāmbuniṣecanaṁ puraripordivyābhiṣekāyate |
kiṁcidbhakṣitamāṁsaśeṣakabalaṁ navyopahārāyate
bhaktiḥ kiṁ na karotyaho vanacaro bhaktāvataṁsāyate ||63||

vakṣastāḍanamantakasya kaṭhināpasmārasaṁmardanaṁ
bhūbhṛtparyaṭanaṁ namassuraśiraḥkoṭīrasaṁgharṣaṇam |
karmedaṁ mṛdulasya tāvakapadadvandvasya gaurīpate
maccetomaṇipādukāviharaṇaṁ śaṁbho sadāṅgīkuru ||64||

vakṣastāḍanaśaṅkayā vicalito vaivasvato nirjarāḥ
koṭīrojjvalaratnadīpakalikānīrājanaṁ kurvate |
dṛṣṭvā muktivadhūstanoti nibhṛtāśleṣaṁ bhavānīpate
yaccetastava pādapadmabhajanaṁ tasyeha kiṁ durlabham ||65||

krīḍārthaṁ sṛjasi prapañcamakhilaṁ krīḍāmṛgāste janāḥ
yatkarmācaritaṁ mayā ca bhavataḥ prītyai bhavatyeva tat |
śaṁbho svasya kutūhalasya karaṇaṁ macceṣṭitaṁ niścitaṁ
tasmānmāmakarakṣaṇaṁ paśupate kartavyameva tvayā ||66||

bahuvidhaparitoṣabāṣpapūrasphuṭapulakāṅkitacārubhogabhūmim |
cirapadaphalakāṅkṣisevyamānāṁ paramasadāśivabhāvanāṁ prapadye ||67||

amitamudamṛtaṁ muhurduhantīṁ vimalabhavatpadagoṣṭhamāvasantīm |
sadaya paśupate supuṇyapākāṁ mama paripālaya bhaktidhenumekām ||68||

jaḍatā paśutā kalaṅkitā kuṭilacaratvaṁ ca nāsti mayi deva |
asti yadi rājamaule bhavadābharaṇasya nāsmi kiṁ pātram ||69||

arahasi rahasi svatantrabuddhyā varivasituṁ sulabhaḥ prasannamūrtiḥ |
agaṇitaphaladāyakaḥ prabhurme jagadadhiko hṛdi rājaśekharo'sti ||70||

ārūḍhabhaktiguṇakuñcitabhāvacāpayuktaiḥ śivasmaraṇabāṇagaṇairamoghaiḥ |
nirjitya kilbiṣaripūn vijayī sudhīndraḥ sānandamāvahati susthirarājalakṣmīm ||71||

dhyānāñjanena samavekṣya tamaḥpradeśaṁ bhitvā mahābalibhirīśvaranāmamantraiḥ |
divyāśritaṁ bhujagabhūṣaṇamudvahanti ye pādapadmamiha te śiva te kṛtārthāḥ ||72||

bhūdāratāmudavahadyadapekṣayā śrībhūdāra eva kimataḥ sumate labhasva |
kedāramākalitamuktimahauṣadhīnāṁ pādāravindabhajanaṁ parameśvarasya ||73||

आशापाशक्लेशदुर्वासनादिभेदोद्युक्तैर्दिव्यगन्धैरमन्दैः ।

आशाशाटीकस्य पादारविन्दं चेतःपेटीं वासितां मे तनोतु॥७४॥

कल्याणिनां सरसचित्रगतिं सवेगं सर्वेङ्गितज्ञमनघं ध्रुवलक्षणाढ्यम् ।

चेतस्तुरङ्गमधिरुह्य चर स्मरारे नेतः समस्तजगतां वृषभाधिरूढ॥७५॥

भक्तिर्महेशपदपुष्करमावसन्ती कादम्बिनीव कुरुते परितोषवर्षम् ।

संपूरितो भवति यस्य मनस्तटाकस्तज्जन्मसस्यमखिलं सफलं च नाऽन्यत्॥७६॥

बुद्धिःस्थिरा भवितुमीश्वरपादपद्मसक्ता वधूर्विरहिणीव सदा स्मरन्ती ।

सद्भावनास्मरणदर्शनकीर्तनादि संमोहितेव शिवमन्त्रजपेन विन्ते॥७७॥

सदुपचारविधिष्वनुबोधितां सविनयां सहृदयं सदुपाश्रिताम् ।

मम समुद्धर बुद्धिमिमां प्रभो वरगुणेन नवोढवधूमिव॥७८॥

नित्यं योगिमनः सरोजदलसञ्चारक्षमस्त्वत्क्रमः शंभो तेन कथं कठोरयमराड्वक्षःकवाटक्षतिः ।

अत्यन्तं मृदुलं त्वदङ्घ्रियुगलं हा मे मनश्चिन्तयत्येतल्लोचनगोचरं कुरु विभो हस्तेन संवाहये॥७९।

एष्यत्येष जनिं मनोऽस्य कठिनं तस्मिन्नटानीति मद्रक्षायै गिरिसीम्नि कोमलपदन्यासः पुराभ्यासितः ।

नोचेद्दिव्यगृहान्तरेषु सुमनस्तल्पेषु वेद्यादिषु प्रायः सत्सु शिलातलेषु नटनं शंभो किमर्थं तव॥८०॥

कंचित्कालमुमामहेश भवतः पादारविन्दार्चनैः कंचिद्ध्यानसमाधिभिश्च नतिभिः कंचित्कथाकर्णनैः ।

कंचित् कंचिदवेक्षनैश्च नुतिभिः कंचिद्दशामीदृशीं यः प्राप्नोति मुदा त्वदर्पितमना जीवन् स मुक्तः खलु॥८१॥

बाणत्वं वृषभत्वमर्धवपुषा भार्यात्वमार्यापते घोणित्वं सखिता मृदङ्गवहता चेत्यादि रूपं दधौ ।

त्वत्पादे नयनार्पणं च कृतवान् त्वद्देहभागो हरिः पूज्यात्पूज्यतरः स एव हि न चेत् को वा तदान्योऽधिकः॥८२॥

जननमृतियुतानां सेवया देवतानां न भवति सुखलेशः संशयो नास्ति तत्र ।

अजनिममृतरूपं साम्बमीशं भजन्ते य इह परमसौख्यं ते हि धन्या लभन्ते॥८३॥

शिव तव परिचर्यासन्निधानाय गौर्या भव मम गुणधुर्यां बुद्धिकन्यां प्रदास्ये ।

सकलभुवनबन्धो सच्चिदानन्दसिन्धो सदय हृदयगेहे सर्वदा संवस त्वम्॥८४॥

जलधिमथनदक्षो नैव पातालभेदी न च वनमृगयायां नैव लुब्धः प्रवीणः।

अशनकुसुमभूषावस्त्रमुख्यां सपर्यां कथय कथमहं ते कल्पयानीन्दुमौले॥८५॥

पूजाद्रव्यसमृद्धयो विरचिताः पूजां कथं कुर्महे पक्षित्वं न च वा किटित्वमपि न प्राप्तं मया दुर्लभम्।

जाने मस्तकमङ्घ्रिपल्लवमुमाजाने न तेऽहं विभो न ज्ञातं हि पितामहेन हरिणा तत्त्वेन तद्रूपिणा॥८६॥

āśāpāśakleśadurvāsanādibhedodyuktairdivyagandhairamandaiḥ |
āśāśāṭīkasya pādāravindaṁ cetaḥpeṭīṁ vāsitāṁ me tanotu ||74||

kalyāṇināṁ sarasacitragatiṁ savegaṁ sarveṅgitajñamanaghaṁ dhruvalakṣaṇāḍhyam |
cetasturaṅgamadhiruhya cara smarāre netaḥ samastajagatāṁ vṛṣabhādhirūḍha ||75||

bhaktirmaheśapadapuṣkaramāvasantī kādambinīva kurute paritoṣavarṣam |
saṁpūrito bhavati yasya manasttaṭākastajjanmasasyamakhilaṁ saphalaṁ ca nā'nyat ||76||

buddhiḥsthirā bhavitumīśvarapādapadmasaktā vadhūrvirahiṇīva sadā smarantī |
sadbhāvanāsmaraṇadarśanakīrtanādi saṁmohiteva śivamantrajapena vinte ||77||

sadupacāravidhiṣvanubodhitāṁ savinayāṁ sahṛdayaṁ sadupāśritām |
mama samuddhara buddhimimāṁ prabho varaguṇena navoḍhavadhūmiva ||78||

nityaṁ yogimanaḥ sarojadalasañcārakṣamastvatkramaḥ
śaṁbho tena kathaṁ kaṭhorayamarāḍvakṣaḥkavāṭakṣatiḥ |
atyantaṁ mṛdulaṁ tvadaṅghriyugalaṁ hā me manaścintaya-
tyetallocanagocaraṁ kuru vibho hastena saṁvāhaye ||79|

eṣyatyeṣa janiṁ mano'sya kaṭhinaṁ tasminnaṭānīti ma-
drakṣāyai girisīmni komalapadanyāsaḥ purābhyāsitaḥ |
noceddivyagṛhāntareṣu sumanastalpeṣu vedyādiṣu
prāyaḥ satsu śilātaleṣu naṭanaṁ śaṁbho kimarthaṁ tava ||80||

kaṁcitkālamumāmaheśa bhavataḥ pādāravindārcanaiḥ
kaṁciddhyānasamādhibhiśca natibhiḥ kaṁcitkathākarṇanaiḥ |
kaṁcit kaṁcidavekṣanaiśca nutibhiḥ kaṁciddaśāmīdṛśīṁ
yaḥ prāpnoti mudā tvadarpitamanā jīvan sa muktaḥ khalu ||81||

bāṇatvaṁ vṛṣabhatvamardhavapuṣā bhāryātvamāryāpate
ghoṇitvaṁ sakhitā mṛdaṅgavahatā cetyādi rūpaṁ dadhau |
tvatpāde nayanārpaṇaṁ ca kṛtavān tvaddehabhāgo hariḥ
pūjyātpūjyataraḥ sa eva hi na cet ko vā tadānyo'dhikaḥ ||82||

jananamṛtiyutānāṁ sevayā devatānāṁ
na bhavati sukhaleśaḥ saṁśayo nāsti tatra |
ajanimamṛtarūpaṁ sāmbamīśaṁ bhajante
ya iha paramasaukhyaṁ te hi dhanyā labhante ||83||

śiva tava paricaryāsannidhānāya gauryā
bhava mama guṇadhuryāṁ buddhikanyāṁ pradāsye |
sakalabhuvanabandho saccidānandasindho
sadaya hṛdayagehe sarvadā saṁvasa tvam ||84||

jaladhimathanadakṣo naiva pātālabhedī
na ca vanamṛgayāyāṁ naiva lubdhaḥ pravīṇaḥ |
aśanakusumabhūṣāvastramukhyāṁ saparyāṁ
kathaya kathamahaṁ te kalpayānīndumaule ||85||

pūjādravyasamṛddhayo viracitāḥ pūjāṁ kathaṁ kurmahe
pakṣitvaṁ na ca vā kiṭitvamapi na prāptaṁ mayā durlabham |
jāne mastakamaṅghripallavamumājāne na te'haṁ vibho
na jñātaṁ hi pitāmahena hariṇā tattvena tadrūpiṇā ||86||

अशलं गरलं फणी कलापो वसनं चर्म च वाहनं महोक्षः ।
मम दास्यसि किं किमस्ति शंभो तव पादाम्बुजभक्तिमेव देहि॥८७॥
यदा कृतांभोनिधिसेतुबन्धनः करस्थलाधःकृतपर्वताधिपः ।
भवानि ते लङ्घितपद्मसंभवः तदा शिवार्चास्तवभावनक्षमः॥८८॥
नतिभिर्नुतिभिस्त्वमीशपूजाविधिभिर्ध्यानसमाधिभिर्न तुष्टः ।
धनुषा मुसलेन चाश्मभिर्वा वद ते प्रीतिकरं तथा करोमि॥८९॥
वचसा चरितं वदामि शंभोरहमुद्योगविधासु तेऽप्रसक्तः ।
मनसा कृतिमीश्वरस्य सेवे शिरसा चैव सदाशिवं नमामि॥९०॥
आद्याऽविद्या हृद्गता निर्गतासीद्विद्या हृद्या हृद्गता त्वत्प्रसादात् ।
सेवे नित्यं श्रीकरं त्वत्पदाब्जं भावे मुक्तेर्भाजनं राजमौले॥९१॥
दूरीकृतानि दुरितानि दुरक्षराणि दौर्भाग्यदुःखदुरहंकृतिदुर्वचांसि ।
सारं त्वदीयचरितं नितरां पिबन्तं गौरीश मामिह समुद्धर सत्कटाक्षैः॥९२॥
सोमकलाधरमौलौ कोमलघनकन्धरे महामहसि । स्वामिनि गिरिजानाथे मामकहृदयं निरन्तरं रमताम्॥९३॥
सा रसना ते नयने तावेव करौ स एव कृतकृत्यः । या ये यौ यो भर्गं वदतीक्षेते सदार्चतः स्मरति॥९४॥
अतिमृदुलौ मम चरणावतिकठिनं ते मनो भवानीश ।
इति विचिकित्सां संत्यज शिव कथमासीद्गिरौ तथा प्रवेशः॥९५॥
धैर्याङ्कुशेन निभृतं रभसादाकृष्य भक्तिश्रृङ्खलया । पुरहर चरणालाने हृदयमदेभं बधान चिद्यन्त्रैः॥९६॥
प्रचरत्यभितः प्रगल्भवृत्त्या मदवानेष मनः करी गरीयान् ।
परिगृह्य नयेन भक्तिरज्ज्वा परम स्थाणुपदं दृढं नयामुम्॥९७॥
सर्वालंकारयुक्तां सरलपदयुतां साधुवृत्तां सुवर्णां सद्भिःसंस्तूयमानां सरसगुणयुतां लक्षितां लक्षणाढ्याम् ।
उद्यद्भूषाविशेषामुपगतविनयां द्योतमानार्थरेखां कल्याणीं देव गौरीप्रिय मम कविताकन्यकां त्वं गृहाण॥९८॥
इदं ते युक्तं वा परमशिव कारुण्यजलधे गतौ तिर्यग्रूपं तव पदशिरोदर्शनधिया ।
हरिब्रह्माणौ तौ दिवि भुवि चरन्तौ श्रमयुतौ कथं शंभो स्वामिन् कथय मम वेद्योऽसि पुरतः॥९९॥
स्तोत्रेणालमहं प्रवच्मि न मृषा देवा विरिञ्चादयः स्तुत्यानं गणनाप्रसङ्गसमये त्वामग्रगण्यं विदुः।
माहात्म्याग्रविचारणप्रकरणे धानातुषस्तोमवद्धूतास्त्वां विदुरुत्तमोत्तमफलं शंभो भवत्सेवकाः॥१००॥
॥ श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ शिवानन्दलहरी सम्पूर्णा॥

aśalaṁ garalaṁ phaṇī kalāpo vasanaṁ carma ca vāhanaṁ mahokṣaḥ |
mama dāsyasi kiṁ kimasti śaṁbho tava pādāmbujabhaktimeva dehi ||87||

yadā kṛtāṁbhonidhisetubandhanaḥ karasthalādhaḥkṛtaparvatādhipaḥ |
bhavāni te laṅghitapadmasaṁbhavaḥ tadā śivārcāstavabhāvanakṣamaḥ ||88||

natibhirnutibhistvamīśapūjāvidhibhirdhyānasamādhibhirna tuṣṭaḥ |
dhanuṣā musalena cāśmabhirvā vada te prītikaraṁ tathā karomi ||89||

vacasā caritaṁ vadāmi śaṁbhorahamudyogavidhāsu te'prasaktaḥ |
manasā kṛtimīśvarasya seve śirasā caiva sadāśivaṁ namāmi ||90||

ādyā'vidyā hṛdgatā nirgatāsīdvidyā hṛdyā hṛdgatā tvatprasādāt |
seve nityaṁ śrīkaraṁ tvatpadābjaṁ bhāve mukterbhājanaṁ rājamaule ||91||

dūrīkṛtāni duritāni durakṣarāṇi
daurbhāgyaduḥkhadurahaṁkṛtidurvacāṁsi |
sāraṁ tvadīyacaritaṁ nitarāṁ pibantaṁ
gaurīśa māmiha samuddhara satkaṭākṣaiḥ ||92||

somakalādharamaulau komalaghanakandhare mahāmahasi |
svāmini girijānāthe māmakahṛdayaṁ nirantaraṁ ramatām ||93||

sā rasanā te nayane tāveva karau sa eva kṛtakṛtyaḥ |
yā ye yau yo bhargaṁ vadatīkṣete sadārcataḥ smarati ||94||

atimṛdulau mama caraṇāvatikaṭhinaṁ te mano bhavānīśa |
iti vicikitsāṁ saṁtyaja śiva kathamāsīdgirau tathā praveśaḥ ||95||

dhairyāṅkuśena nibhṛtaṁ rabhasādākṛṣya bhaktiśṛṅkhalayā |
purahara caraṇālāne hṛdayamadebhaṁ badhāna cidyantraiḥ ||96||

pracaratyabhitaḥ pragalbhavṛttyā madavāneṣa manaḥ karī garīyān |
parigṛhya nayena bhaktirajjvā parama sthāṇupadaṁ dṛḍhaṁ nayāmum ||97||

sarvālaṁkārayuktāṁ saralapadayutāṁ sādhuvṛttāṁ suvarṇāṁ
sadbhiḥsaṁstūyamānāṁ sarasaguṇayutāṁ lakṣitāṁ lakṣaṇāḍhyām |
udyadbhūṣāviśeṣāmupagatavinayāṁ dyotamānārtharekhāṁ
kalyāṇīṁ deva gaurīpriya mama kavitākanyakāṁ tvaṁ gṛhāṇa ||98||

idaṁ te yuktaṁ vā paramaśiva kāruṇyajaladhe
gatau tiryagrūpaṁ tava padaśirodarśanadhiyā |
haribrahmāṇau tau divi bhuvi carantau śramayutau
kathaṁ śaṁbho svāmin kathaya mama vedyo'si purataḥ ||99||

stotreṇālamahaṁ pravacmi na mṛṣā devā viriñcādayaḥ
stutyānaṁ gaṇanāprasaṅgasamaye tvāmagragaṇyaṁ viduḥ |
māhātmyāgravicāraṇaprakaraṇe dhānātuṣastomava-
ddhūtāstvāṁ viduruttamottamaphalaṁ śaṁbho bhavatsevakāḥ ||100||

|| śrīmatparamahaṁsaparivrājakācāryasya śrīgovindabhagavatpūjyapādaśiṣyasya
śrīmacchaṅkarabhagavataḥ kṛtau śivānandalaharī sampūrṇā ||

|| śankarācarya padāvalamba suvarṇamālāstuti ||

Recite these on day 2:

॥ एकश्लोकी॥

किं ज्योतिस्तवभानुमानहनि मे रात्रौ प्रदीपादिकं स्यादेवं रविदीपदर्शनविधौ किं ज्योतिराख्याहि मे ।

चक्शुस्तस्य निमीलनादिसमये किं धीर्धियो दर्शने किं तत्राहमतो भवान्परमकं ज्योतिस्तदस्मि प्रभो॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ एकश्लोकी संपूर्णा॥

॥ दशश्लोकी॥

न भूमिर्न तोयं न तेजो न वायुः न खं नेन्द्रियं वा न तेषां समूहः।

अनेकान्तिकत्वात् सुषुप्त्येकसिद्धः तदेकोऽवशिष्टः शिवः केवलोऽहम्॥ १॥

न वर्णा न वर्णाश्रमाचारधर्मा न मे धारणाध्यानयोगादयोपि ।

अनात्माश्रयाहंममाध्यासहानात् तदेकोऽवशिष्टः शिवः केवलोऽहम्॥ २॥

न माता पिता वा न देवा न लोका न वेदा न यज्ञा न तीर्थं ब्रुवन्ति ।

सुषप्तौ निरस्तातिशून्यात्मकत्वात् तदेकोऽवशिष्टः शिवः केवलोऽहम्॥ ३॥

न साख्यं न शैवं न तत्पाञ्चरात्रं न जैनं न मीमांसकादेर्मतं वा ।

विशिष्टानुभूत्या विशुद्धात्मकत्वात् तदेकोऽवशिष्टः शिवः केवलोऽहम्॥ ४॥

न चोर्ध्वं न चाधो न चान्तर्न बाह्यं न मध्यं न तिर्यँ न पूर्वाऽपरा दिक् ।

वियद्व्यापकत्वादखण्डैकरूपः तदेकोऽवशिष्टः शिवः केवलोऽहम्॥ ५॥

न शुक्लं न कृष्णं न रक्तं न पीतं न कुब्जं न पीनं न ह्रस्वं न दीर्घम् ।

अरूपं तथा ज्योतिराकारकत्वात् तदेकोऽवशिष्टः शिवः केवलोऽहम्॥ ६॥

न शास्ता न शास्त्रं न शिष्यो न शिक्षा न च त्वं न चाहं न चायं प्रपञ्चः ।

स्वरूपावबोधो विकल्पासहिष्णुः तदेकोऽवशिष्टः शिवः केवलोऽहम्॥ ७॥

न जाग्रन् न मे स्वप्नको वा सुषुप्तिः न विश्वौ न वा तैजसः प्राज्ञको वा ।

अविद्यात्मकत्वात् त्रयाणं तुरीयः तदेकोऽवशिष्टः शिवः केवलोऽहम्॥ ८॥

अपि व्यापकत्वात् हितत्वप्रयोगात् स्वतः सिद्धभावादनन्याश्रयत्वात् ।

जगत् तुच्छमेतत् समस्तं तदन्यत् तदेकोऽवशिष्टः शिवः केवलोऽहम्॥ ९॥

न चैकं तदन्यद् द्वितीयं कुतः स्यात् न केवलत्वं न चाऽकेवलत्वम् ।

न शुन्यं न चाशून्यमद्वैतकत्वात् कथं सर्ववेदान्तसिद्धं ब्रवीमि॥ १०॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ दशश्लोकी सम्पूर्णा॥

Recite these on day 2:

|| ekaślokī ||

kiṁ jyotistavabhānumānahani me rātrau pradīpādikaṁ
syādevaṁ ravidīpadarśanavidhau kiṁ jyotirākhyāhi me |
cakśustasya nimīlanādisamaye kiṁ dhīrdhiyo darśane
kiṁ tatrāhamato bhavānparamakaṁ jyotistadasmi prabho ||

|| iti śrīmatparamahaṁsaparivrājakācāryasya śrīgovindabhagavatpūjyapādaśiṣyasya
śrīmacchaṅkarabhagavataḥ kṛtau ekaślokī saṁpūrṇā ||

|| daśaślokī ||

na bhūmirna toyaṁ na tejo na vāyuḥ na khaṁ nendriyaṁ vā na teṣāṁ samūhaḥ |
anekāntikatvāt suṣuptyekasiddaḥ tadeko'vaśiṣṭaḥ śivaḥ kevalo'ham ||1||

na varṇā na varṇāśramācāradharmā na me dhāraṇādhyānayogādayopi |
anātmāśrayāhaṁmamādhyāsahānāt tadeko'vaśiṣṭaḥ śivaḥ kevalo'ham ||2||

na mātā pitā vā na devā na lokā na vedā na yajñā na tīrtha bruvanti |
suṣaptau nirastātiśūnyātmakatvāt tadeko'vaśiṣṭaḥ śivaḥ kevalo'ham ||3||

na sākhyaṁ na śaivaṁ na tatpāñcarātraṁ na jainaṁ na mīmāṁsakādermataṁ vā |
viśiṣṭānubhūtyā viśuddhātmakatvāt tadeko'vaśiṣṭaḥ śivaḥ kevalo'ham ||4||

na cordhva na cādho na cāntarna bāhyaṁ na madhyaṁ na tiryaङ् na pūrvā'parā dik |
viyadvyāpakatvādakhaṇḍaikarūpaḥ tadeko'vaśiṣṭaḥ śivaḥ kevalo'ham ||5||

na śuklaṁ na kṛṣṇaṁ na raktaṁ na pītaṁ na kubjaṁ na pīnaṁ na hrasvaṁ na dīrgham |
arūpaṁ tathā jyotirākārakatvāt tadeko'vaśiṣṭaḥ śivaḥ kevalo'ham ||6||

na śāstā na śāstraṁ na śiṣyo na śikṣā na ca tvaṁ na cāhaṁ na cāyaṁ prapañcaḥ |
svarūpāvabodho vikalpāsahiṣṇuḥ tadeko'vaśiṣṭaḥ śivaḥ kevalo'ham ||7||

na jāgran na me svapnako vā suṣuptiḥ na viśvau na vā taijasaḥ prājñako vā |
avidyātmakatvāt trayāṇaṁ turīyaḥ tadeko'vaśiṣṭaḥ śivaḥ kevalo'ham ||8||

api vyāpakatvāt hitatvaprayogāt svataḥ siddhabhāvādananyāśrayatvāt |
jagat tucchametat samastaṁ tadanyat tadeko'vaśiṣṭaḥ śivaḥ kevalo'ham ||9||

na caikaṁ tadanyad dvitīyaṁ kutaḥ syāt na kevalatvaṁ na cā'kevalatvam |
na śunyaṁ na cāśūnyamadvaitakatvāt kathaṁ sarvavedāntasiddhaṁ bravīmi ||10||

|| iti śrīmatparamahaṁsaparivrājakācāryasya śrīgovindabhagavatpūjyapādaśiṣyasya
śrīmacchaṅkarabhagavataḥ kṛtau daśaślokī sampūrṇā ||

॥ श्री सुब्रह्मण्य भुजङ्गम् ॥

सदा बालरूपाऽपि विघ्नाद्रिहन्त्री महादन्तिवक्त्राऽपि पञ्चास्यमान्या ।
विधीन्द्रादिमृग्या गणेशाभिधा मे विधत्तां श्रियं काऽपि कल्याणमूर्तिः ॥ १ ॥
न जानामि शब्दं न जानामि चार्थं न जानामि पद्यं न जानामि गद्यम् ।
चिदेका षडास्य हृदि द्योतते मे मुखान्निःसरन्ते गिरश्चापि चित्रम् ॥ २ ॥
मयूराधिरूढं महावाक्यगूढं मनोहारिदेहं महच्चित्तगेहम् ।
महीदेवदेवं महावेदभावं महादेवबालं भजे लोकपालम् ॥ ३ ॥
यदा संनिधानं गता मानवा मे भवाम्भोधिपारं गतास्ते तदैव ।
इति व्यञ्जयन्सिन्धुतीरे य आस्ते तमीडे पवित्रं पराशक्तिपुत्रम् ॥ ४ ॥
यथाब्धेस्तरङ्गा लयं यन्ति तुङ्गास्तथैवापदः सन्निधौ सेवतां मे ।
इतीवोर्मिपंक्तीर्नृणां दर्शयन्तं सदा भावये हृत्सरोजे गुहं तम् ॥ ५ ॥
गिरौ मन्निवासे नरा येऽधिरूढास्तदा पर्वते राजते तेऽधिरूढाः ।
इतीव ब्रुवन्गन्धशैलाधिरूढः स देवो मुदे मे सदा षण्मुखोऽस्तु ॥ ६ ॥
महाम्भोधितीरे महापापचोरे मुनिन्द्रानुकूले सुगन्धाख्यशैले ।
गुहायां वसन्तं स्वभासा लसन्तं जनार्तिं हरन्तं श्रयामो गुहं तम् ॥ ७ ॥
लसत्स्वर्णगेहे नृणां कामदोहे सुमस्तोमसंछन्नमाणिक्यमञ्चे ।
समुद्यत्सहस्रार्कतुल्यप्रकाशं सदा भावये कार्तिकेयं सुरेशम् ॥ ८ ॥
रणद्धंसके मञ्जुलेऽत्यन्तशोणे मनोहारिलावण्यपीयूषपूर्णे ।
मनःषट्पदो मे भवक्लेशतप्तः सदा मोदतां स्कन्द ते पादपद्मे ॥ ९ ॥
सुवर्णाभदिव्याम्बरैर्भासमानां क्वणत्किङ्किणीमेखलाशोभमानाम् ।
लसद्धेमपट्टेन विद्योतमानां कटिं भावये स्कन्द ते दीप्यमानाम् ॥ १० ॥
पुलिन्देशकन्याघनाभोगतुङ्गस्तनालिङ्गनासक्तकाश्मीररागम् ।
नमस्यामहं तारकारे तवोरः स्वभक्तावने सर्वदा सानुरागम् ॥ ११ ॥
विधौ क्लृप्तदण्डान् स्वलीलाधृताण्डान्निरस्तेभशुण्डान् द्विषत्कालदण्डान् ।
हतेन्द्रारिषण्डाञ्जगत्राणशौण्डान् सदा ते प्रचण्डान् श्रये बाहुदण्डान् ॥ १२ ॥

|| śrī subrahmaṇya bhujaṅgam ||

sadā bālarūpā'pi vighnādrihantrī mahādantivaktrā'pi pañcāsyamānyā |
vidhīndrādimṛgyā gaṇeśābhidhā me vidhattāṁ śriyaṁ kā'pi kalyāṇamūrtiḥ ||1||

na jānāmi śabdaṁ na jānāmi cārthaṁ na jānāmi padyaṁ na jānāmi gadyam |
cidekā ṣaḍāsya hṛdi dyotate me mukhānniḥsarante giraścāpi citram ||2||

mayūrādhirūḍhaṁ mahāvākyagūḍhaṁ manohāridehaṁ mahaccittageham |
mahīdevadevaṁ mahāvedabhāvaṁ mahādevabālaṁ bhaje lokapālam ||3||

yadā saṁnidhānaṁ gatā mānavā me bhavāmbhodhipāraṁ gatāste tadaiva |
iti vyañjayansindhutīre ya āste tamīḍe pavitraṁ parāśaktiputram ||4||

yathābdhestaraṅgā layaṁ yanti tuṅgāstathaivāpadaḥ sannidhau sevatāṁ me |
itīvormipaṁktīrnṛṇāṁ darśayantaṁ sadā bhāvaye hṛtsaroje guhaṁ tam ||5||

girau mannivāse narā ye'dhirūḍhāstadā parvate rājate te'dhirūḍhāḥ |
itīva bruvangandhaśailādhirūḍhaḥ sa devo mude me sadā ṣaṇmukho'stu ||6||

mahāmbhodhitīre mahāpāpacore munindrānukūle sugandhākhyaśaile |
guhāyāṁ vasantaṁ svabhāsā lasantaṁ janārtiṁ harantaṁ śrayāmo guhaṁ tam ||7||

lasatsvarṇagehe nṛṇāṁ kāmadohe sumastomasaṁchannamāṇikyamañce |
samudyatsahasrārkatulyaprakāśaṁ sadā bhāvaye kārtikeyaṁ sureśam ||8||

raṇaddhaṁsake mañjule'tyantaśoṇe manohārilāvaṇyapīyūṣapūrṇe |
manaḥṣaṭpado me bhavakleśataptaḥ sadā modatāṁ skanda te pādapadme ||9||

suvarṇābhadivyāmbarairbhāsamānāṁ kvaṇatkiṅkiṇīmekhalāśobhamānām |
lasaddhemapaṭṭena vidyotamānāṁ kaṭiṁ bhāvaye skanda te dīpyamānām ||10||

pulindeśakanyāghanābhogatuṅgastanāliṅganāsaktakāśmīrarāgam |
namasyāmahaṁ tārakāre tavoraḥ svabhaktāvane sarvadā sānurāgam ||11||

vidhau kḷptadaṇḍān svalīlādhṛtāṇḍānnirastebhaśuṇḍān dviṣatkāladaṇḍān |
hatendrāriṣaṇḍāñjagatrāṇaśauṇḍānsadā te pracaṇḍān śraye bāhudaṇḍān ||12||

सदा शारदाः षण्मृगाङ्का यदि स्युः समुद्यन्त एव स्थिताश्चेत्समन्तात् ।
सदा पूर्णबिम्बाः कलङ्कैश्च हीनास्तदा त्वन्मुखानां ब्रुवे स्कन्द साम्यम् ॥ १३ ॥
स्फुरन्मन्दहासैः सहंसानि चञ्चत्कटाक्षावलीभृङ्गसंघोज्ज्वलानि ।
सुधास्यन्दिबिम्बाधरणीशसूनो तवालोकये षण्मुखाम्भोरुहाणि ॥ १४ ॥
विशालेषु कर्णान्तदीर्घेष्वजस्रं दयास्यन्दिषु द्वादशस्वीक्षणेषु ।
मयीषत्कटाक्षः सकृत्पातितश्चेद्भवेत्ते दयाशील का नाम हानिः ॥ १५ ॥
सुताङ्गोद्भवो मेऽसि जीवेति षड्वा जपन्मन्त्रमीशो मुदा जिघ्रते यान् ।
जगद्भारभृद्भ्यो जगन्नाथ तेभ्यः किरीटोज्ज्वलेभ्यो नमो मस्तकेभ्यः ॥ १६ ॥
स्फुरद्रत्नकेयूरहाराभिरामश्चलत्कुण्डलश्रीलसद्गण्डभागः ।
कटौ पीतवासः करे चारुशक्तिः पुरस्तान्ममास्तां पुरारेस्तनूजः ॥ १७ ॥
इहायाहि वत्सेति हस्तान्प्रसार्याह्वयत्यादराच्छङ्करे मातुरङ्कात् ।
समुत्पत्य तातं श्रयन्तं कुमारं हराश्लिष्टगात्रं भजे  बालमूर्तिम् ॥ १८ ॥
कुमारेशसूनो गुह स्कन्द सेनापते शक्तिपाणे मयूराधिरूढ ।
पुलिन्दात्मजाकान्त भक्तार्तिहारिन् प्रभो तारकारे सदा रक्ष मां त्वम् ॥ १९ ॥
प्रशान्तेन्द्रिये नष्टसंज्ञे विचेष्टे कफोद्गारिवक्त्रे भयोत्कम्पिगात्रे ।
प्रयाणोन्मुखे मय्यनाथे तदानीं द्रुतं मे दयालो भवाग्रे गुह त्वम् ॥ २० ॥
कृतान्तस्य दूतेषु चण्डेषु कोपाद्दह च्छिन्द्धि भिन्द्धीति मां तर्जयत्सु।
मयूरं समारुह्य मा भैरिति त्वं पुरः शक्तिपाणिर्ममायाहि शीघ्रम् ॥ २१ ॥
प्रणम्यासकृत्पादयोस्ते पतित्वा प्रसाद्य प्रभो प्रार्थयेऽनेकवारम् ।
न वक्तुं क्षमोऽहं तदानीं कृपाब्धे न कार्यान्तकाले मनागप्युपेक्षा ॥ २२ ॥
सहस्राण्डभोक्ता त्वया शूरनामा हतस्तारकः सिंहवक्त्रश्च दैत्यः ।
ममान्तर्हृदिस्थं मनःक्लेशमेकं न हंसि प्रभो किं करोमि क्व यामि ॥ २३ ॥
अहं सर्वदा दुःखभारावसन्नो भवान्दीनबन्धुस्त्वदन्यं न याचे ।
भवद्भक्तिरोधं सदा क्ळृप्तबाधं ममाधिं द्रुतं नाशयोमासुत त्वम् ॥ २४ ॥
अपस्मारकुष्टक्षयार्शः प्रमेहज्वरोन्मादगुल्मादिरोगा महान्तः ।
पिशाचाश्च सर्वे भवत्पत्रभूतिं विलोक्य क्षणात्तारकारे द्रवन्ते ॥ २५ ॥

sadā śāradāḥ ṣaṇmṛgāṅkā yadi syuḥ samudyanta eva sthitāścetsamantāt |
sadā pūrṇabimbāḥ kalaṅkaiśca hīnāstadā tvanmukhānāṁ bruve skanda sāmyam ||13||

sphuranmandahāsaiḥ sahaṁsāni cañcatkaṭākṣāvalībhṛṅgasaṁghojjvalāni |
sudhāsyandibimbādharaṇīśasūno tavālokaye ṣaṇmukhāmbhoruhāṇi ||14||

viśāleṣu karṇāntadīrgheṣvajasraṁ dayāsyandiṣu dvādaśasvīkṣaṇeṣu |
mayīṣatkaṭākṣaḥ sakṛtpātitaścedbhavette dayāśīla kā nāma hāniḥ ||15||

sutāṅgodbhavo me'si jīveti ṣaḍdhā japanmantramīśo mudā jighrate yān |
jagadbhārabhṛdbhyo jagannātha tebhyaḥ kirīṭojjvalebhyo namo mastakebhyaḥ ||16||

sphuradratnakeyūrahārābhirāmaścalatkuṇḍalaśrīlasadgaṇḍabhāgaḥ |
kaṭau pītavāsaḥ kare cāruśaktiḥ purastānmamāstāṁ purārestanūjaḥ ||17||

ihāyāhi vatseti hastānprasāryāhvayatyādarācchaṅkare māturaṅkāt |
samutpatya tātaṁ śrayantaṁ kumāraṁ harāśliṣṭagātraṁ bhaje  bālamūrtim ||18||

kumāreśasūno guha skanda senāpate śaktipāṇe mayūrādhirūḍha |
pulindātmajākānta bhaktārtihārin prabho tārakāre sadā rakṣa māṁ tvam ||19||

praśāntendriye naṣṭasaṁjñe viceṣṭe kaphodgārivaktre bhayotkampigātre |
prayāṇonmukhe mayyanāthe tadānīṁ drutaṁ me dayālo bhavāgre guha tvam ||20||

kṛtāntasya dūteṣu caṇḍeṣu kopāddaha cchinddhi bhinddhīti māṁ tarjayatsu |
mayūraṁ samāruhya mā bhairiti tvaṁ puraḥ śaktipāṇirmamāyāhi śīghram ||21||

praṇamyāsakṛtpādayoste patitvā prasādya prabho prārthaye'nekavāram |
na vaktuṁ kṣamo'haṁ tadānīṁ kṛpābdhe na kāryāntakāle manāgapyupekṣā ||22||

sahasrāṇḍabhoktā tvayā śūranāmā hatastārakaḥ siṁhavaktraśca daityaḥ |
mamāntarhṛdisthaṁ manaḥkleśamekaṁ na haṁsi prabho kiṁ karomi kva yāmi ||23||

ahaṁ sarvadā duḥkhabhārāvasanno bhavāndīnabandhustvadanyaṁ na yāce |
bhavadbhaktirodhaṁ sadā kḷptabādhaṁ mamādhiṁ drutaṁ nāśayomāsuta tvam ||24||

apasmārakuṣṭakṣayārśaḥ pramehajvaronmādagulmādirogā mahāntaḥ |
piśācāśca sarve bhavatpatrabhūtiṁ vilokya kṣaṇāttārakāre dravante ||25||

दृशि स्कन्दमूर्तिः श्रुतौ स्कन्दकीर्तिर्मुखे मे पवित्रं सदा तच्चरित्रम् ।
करे तस्य कृत्यं वपुस्तस्य भृत्यं गुहे सन्तु लीना ममाशेषभावाः ॥ २६ ॥
मुनीनामुताहो नृणां भक्तिभाजामभीष्टप्रदाः सन्ति सर्वत्र देवाः ।
नृणामन्त्यजानामपि स्वार्थदाने गुहाद्देवमन्यं न जाने न जाने ॥ २७ ॥
कलत्रं सुता बन्धुवर्गः पशुर्वा नरो वाथ नारि गृहे ये मदियाः ।
यजन्तो नमन्तः स्तुवन्तो भवन्तं स्मरन्तश्च ते सन्तु सर्वे कुमार ॥ २८ ॥
मृगाः पक्षिणो दंशका ये च दुष्टास्तथा व्याधयो बाधका ये मदङ्गे ।
भवच्छक्तितीक्ष्णाग्रभिन्नाः सुदूरे विनश्यन्तु ते चूर्णितक्रौञ्चशैल ॥ २९ ॥
जनित्री पिता च स्वपुत्रापराधं सहेते न किं देवसेनाधिनाथ ।
अहं चातिबालो भवान् लोकतातः क्षमस्वापराधं समस्तं महेश ॥ ३० ॥
नमः केकिने शक्तये चापि तुभ्यं नमश्छाग तुभ्यं नमः कुक्कुटाय ।
नमः सिन्धवे सिन्धुदेशाय तुभ्यं पुनः स्कन्दमूर्ते नमस्ते नमोऽस्तु ॥ ३१ ॥
जयानन्दभूमञ्जयापारधाम ञ्जयामोघकीर्ते जयानन्दमूर्ते ।
जयानन्दसिन्धो जयाशेषबन्धो जय त्वं सदा मुक्तिदानेशसूनो ॥ ३२ ॥
भुजङ्गाख्यवृत्तेन क्लृप्तं स्तवं यः पठेद्भक्तियुक्तो गुहं संप्रणम्य ।
सुपुत्रान्कलत्रं धनं दीर्घमायु र्लभेत्स्कन्दसायुज्यमन्ते नरः सः ॥ ३३ ॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ श्रीसुब्रह्मण्यभुजङ्गं संपूर्णम् ॥

## ॥ श्रीशङ्कराचार्यभुजङ्गप्रयात स्तोत्रम् ॥

कृपासागरायाशुकाव्यप्रदाय प्रणम्राखिलाभीष्टसन्दायकाय ।
यतीन्द्रैरुपास्याङ्घ्रिपाथोरुहाय प्रबोधप्रदात्रे नमः शङ्कराय ॥ १ ॥
चिदानन्दरूपाय चिन्मुद्रिकोद्यत्करायेशपर्यायरूपाय तुभ्यम् ।
मुदा गीयमानाय वेदोत्तमाङ्गैः श्रितानन्ददात्रे नमः शङ्कराय ॥ २ ॥
जटाजूटमध्ये पुरा या सुराणां धुनी साद्य कर्मन्दिरूपस्य शम्भोः ।
गले मल्लिकामालिकाव्याजतस्ते विभातीति मन्ये गुरो किं तथैव ॥ ३ ॥

dṛśi skandamūrtiḥ śrutau skandakīrtirmukhe me pavitraṁ sadā taccaritram |
kare tasya kṛtyaṁ vapustasya bhṛtyaṁ guhe santu līnā mamāśeṣabhāvāḥ ||26||

munīnāmutāho nṛṇāṁ bhaktibhājāmabhīṣṭapradāḥ santi sarvatra devāḥ |
nṛṇāmantyajānāmapi svārthadāne guhāddevamanyaṁ na jāne na jāne ||27||

kalatraṁ sutā bandhuvargaḥ paśurvā naro vātha nāri gṛhe ye madiyāḥ |
yajanto namantaḥ stuvanto bhavantaṁ smarantaśca te santu sarve kumāra ||28||

mṛgāḥ pakṣiṇo daṁśakā ye ca duṣṭāstathā vyādhayo bādhakā ye madaṅge |
bhavacchaktitīkṣṇāgrabhinnāḥ sudūre vinaśyantu te cūrṇitakrauñjaśaila ||29||

janitrī pitā ca svaputrāparādhaṁ sahete na kiṁ devasenādhinātha |
ahaṁ cātibālo bhavān lokatātaḥ kṣamasvāparādhaṁ samastaṁ maheśa ||30||

namaḥ kekine śaktaye cāpi tubhyaṁ namaśchāga tubhyaṁ namaḥ kukkuṭāya |
namaḥ sindhave sindhudeśāya tubhyaṁ punaḥ skandamūrte namaste namo'stu ||31||

jayānandabhūmañjayāpāradhāmañjayāmoghakīrte jayānandamūrte |
jayānandasindho jayāśeṣabandho jaya tvaṁ sadā muktidāneśasūno ||32||

bhujaṅgākhyavṛttena kḷptaṁ stavaṁ yaḥ paṭhedbhaktiyukto guhaṁ saṁpraṇamya |
suputrānkalatraṁ dhanaṁ dīrghamāyurlabhetskandasāyujyamante naraḥ saḥ ||33||

|| iti śrīmatparamahaṁsaparivrājakācāryasya śrīgovindabhagavatpūjyapādaśiṣyasya
śrīmacchaṅkarabhagavataḥ kṛtau śrīsubrahmaṇyabhujaṅgaṁ saṁpūrṇam ||

## || śrīśaṅkarācāryabhujaṅgaprayāta-stotram ||

kṛpāsāgarāyāśukāvyapradāya praṇamrākhilābhīṣṭasandāyakāya |
yatīndrairupāsyāṅghripāthoruhāya prabodhapradātre namaḥ śaṅkarāya ||1||

cidānandarūpāya cinmudrikodyatkarāyeśaparyāyarūpāya tubhyam |
mudā gīyamānāya vedottamāṅgaiḥ śritānandadātre namaḥ śaṅkarāya ||2||

jaṭājūṭamadhye purā yā surāṇāṁ dhunī sādya karmandirūpasya śambhoḥ
gale mallikāmālikāvyājataste vibhātīti manye guro kiṁ tathaiva ||3||

नखेन्दुप्रभाधूतनम्रालिहार्दान्धकारव्रजायाब्जमन्दस्मिताय ।

महामोहपाथोनिधेर्बाडबाय प्रशान्ताय कुर्मो नमः शङ्कराय॥४॥

प्रणम्रान्तरङ्गाब्जबोधप्रदात्रे दिवारात्रमव्याहतोस्राय कामम् ।

क्षपेशाय चित्राय लक्ष्म क्षयाभ्यां विहीनाय कुर्मो नमः शङ्कराय॥५॥

प्रणम्रास्यपाथोजमोदप्रदात्रे सदान्तस्तमस्तोमसंहारकर्त्रे ।

रजन्या मपीद्धप्रकाशाय कुर्मो ह्यपूर्वाय पूष्णे नमः शङ्कराय॥६॥

नतानां हृदब्जानि फुल्लानि शीघ्रं करोम्याशु योगप्रदानेन नूनम् ।

प्रबोधाय चेत्थं सरोजानि धत्से प्रफुल्लानि किं भो गुरो ब्रूहि मह्यम्॥७॥

प्रभाधूतचन्द्रायुतायाखिलेष्टप्रदायानतानां समूहाय शीघ्रम् ।

प्रतीपाय नम्रौघदुःखाघपङ्क्तेर्मुदा सर्वदा स्यान्नमः शङ्कराय॥८॥

विनिष्कासितानीश तत्त्वावबोधान्नतानां मनोभ्यो ह्यनन्याश्रयाणि ।

रजांसि प्रपन्नानि पादाम्बुजातं गुरो रक्तवस्त्रापदेशाद्बिभर्षि॥९॥

मतेर्वेदशीर्षाध्वसम्प्रापकायानतानां जनानां कृपार्द्रैः कटाक्षैः ।

ततेः पापबृन्दस्य शीघ्रं निहन्त्रे स्मितास्याय कुर्मो नमः शङ्कराय॥१०॥

सुपर्वोक्तिगन्धेन हीनाय तूर्णं पुरा तोटकायाखिलज्ञानदात्रे ।

प्रवालीयगर्वापहारस्य कर्त्रे पदाब्जम्रदिम्ना नमः शङ्कराय॥११॥

भवाम्भोधिमग्नान्जनान्दुःखयुक्तान् जवादुद्दिधीर्षुर्भवानित्यहोऽहम् ।

विदित्वा हि ते कीर्तिमन्यादृशाम्भो सुखं निर्विशङ्कः स्वपिम्यस्तयत्नः॥१२॥

॥ इति श्रीसच्चिदानन्द-शिवाभिनव-नृसिंह-भारती महास्वामिभिः श्रीकालटिक्षेत्रे विरचितं श्रीशङ्कराचार्य-भुजङ्गप्रयातस्तोत्रम् संपूर्णम् ॥

Recite these on day 3:

॥ लक्ष्मीनृसिंहपञ्चरत्नम्॥

त्वत्प्रभुजीवप्रियमिच्छसि चेन्नरहरिपूजां कुरु सततं प्रतिबिम्बालंकृतिधृतिकुशलो बिम्बालंकृतिमातनुते ।

चेतोभृङ्ग भ्रमसि वृथा भवमरुभूमौ विरसायां भज भज लक्ष्मीनरसिंहानघपदसरसिजमकरन्दम्॥१॥

शुक्तौ रजतप्रतिभा जाता कतकाद्यर्थसमर्था चेद्दुःखमयी ते संसृतिरेषा निर्वृतिदाने निपुणा स्यात् ।

चेतोभृङ्ग भ्रमसि वृथा भवमरुभूमौ विरसायां भज भज लक्ष्मीनरसिंहानघपदसरसिजमकरन्दम्॥२॥

nakhenduprabhādhūtanamrālihārdāndhakāravrajāyābjamandasmitāya |
mahāmohapāthonidherbāḍabāya praśāntāya kurmo namaḥ śaṅkarāya ||4||

praṇamrāntaraṅgābjabodhapradātre divārātramavyāhatosrāya kāmam |
kṣapeśāya citrāya lakṣma kṣayābhyāṁ vihīnāya kurmo namaḥ śaṅkarāya ||5||

praṇamrāsyapāthojamodapradātre sadāntastamastomasaṁhārakartre |
rajanyā mapīddhaprakāśāya kurmo hyapūrvāya pūṣṇe namaḥ śaṅkarāya ||6||

natānāṁ hṛdabjāni phullāni śīghraṁ karomyāśu yogapradānena nūnam |
prabodhāya cetthaṁ sarojāni dhatse praphullāni kiṁ bho guro brūhi mahyam ||7||

prabhādhūtacandrāyutāyākhileṣṭapradāyānatānāṁ samūhāya śīghram |
pratīpāya namraughaduḥkhāghapaṅktermudā sarvadā syānnamaḥ śaṅkarāya ||8||

viniṣkāsitānīśa tattvāvabodhānnatānāṁ manobhyo hyananyāśrayāṇi |
rajāṁsi prapannāni pādāmbujātaṁ guro raktavastrāpadeśādbibharṣi ||9||

matervedaśīrṣādhvasamprāpakāyānatānāṁ janānāṁ kṛpārdraiḥ kaṭākṣaiḥ |
tateḥ pāpabṛndasya śīghraṁ nihantre smitāsyāya kurmo namaḥ śaṅkarāya ||10||

suparvoktigandhena hīnāya tūrṇaṁpurā toṭakāyākhilajñānadātre |
pravālīyagarvāpahārasya kartre padābjamradimnā namaḥ śaṅkarāya ||11||

bhavāmbhodhimagnānjanānduḥkhayuktān javāduddidhīrṣurbhavānityaho'ham |
viditvā hi te kīrtimanyādṛśāmbho sukhaṁ nirviśaṅkaḥ svapimyastayatnaḥ ||12||

|| iti śrīsaccidānanda-śivābhinava-nṛsiṁha-bhāratī mahāsvāmibhiḥ śrīkālaṭikṣetre viracitaṁ
śrīśaṅkarācārya-bhujaṅgaprayātastotram saṁpūrṇam ||

Recite these on day 3

|| lakśmīnṛsiṁhapañcaratnam ||

tvatprabhujīvapriyamicchasi cennaraharipūjāṁ kuru satataṁ
pratibimbālaṁkṛtidhṛtikuśalo bimbālaṁkṛtimātanute |
cetobhṛṅga bhramasi vṛthā bhavamarubhūmau virasāyāṁ
bhaja bhaja lakśmīnarasiṁhānaghapadasarasijamakarandam ||1||

śukttau rajatapratibhā jātā katakādyarthasamarthā ce-
dduḥkhamayī te saṁsṛtireṣā nirvṛtidāne nipuṇā syāt |
cetobhṛṅga bhramasi vṛthā bhavamarubhūmau virasāyāṁ
bhaja bhaja lakśmīnarasiṁhānaghapadasarasijamakarandam ||2||

आकृतिसाम्याच्छाल्मलिकुसुमे स्थलनलिनत्वभ्रममकरोः

गन्धरसाविह किमु विद्येते विफलं भ्राम्यसि भृशविरसेऽस्मिन् ।

चेतोभृङ्ग भ्रमसि वृथा भवमरुभूमौ विरसायां

भज भज लक्ष्मीनरसिंहानघपदसरसिजमकरन्दम् ॥ ३ ॥

स्रक्चन्दनवनितादीन्विषयान्सुखदान्मत्वा तत्र विहरसे गन्धफलीसदृशा ननु तेऽमी भोगानन्तरदुःखकृतः स्युः ।

चेतोभृङ्ग भ्रमसि वृथा भवमरुभूमौ विरसायां भज भज लक्ष्मीनरसिंहानघपदसरसिजमकरन्दम् ॥ ४ ॥

तव हितमेकं वचनं वक्ष्ये शृणु सुखकामो यदि सततं स्वप्ने दृष्टं सकलं हि मृषा जाग्रति च स्मर तद्वदिति ।

चेतोभृङ्ग भ्रमसि वृथा भवमरुभूमौ विरसायां भज भज लक्ष्मीनरसिंहानघपदसरसिजमकरन्दम् ॥ ५ ॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्री गोविन्द भगवत्पूज्यपाद शिष्यस्य श्रीमच्छंकर भगवतः कृतौ लक्ष्मीनृसिंहपञ्चरत्नम् सम्पूर्णम् ॥

## ॥ लक्ष्मीनृसिंहकरुणावलम्बस्तोत्रम् ॥

श्रीमत्पयोनिधिनिकेतनचक्रपाणे भोगीन्द्रभोगमणिराजितपुण्यमूर्ते ।

योगीश शाश्वत शरण्य भवाब्धिपोत लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ १ ॥

ब्रह्मेन्द्ररुद्रमरुदर्ककिरीटकोटिसङ्घट्टिताङ्घ्रिकमलामलकान्तिकान्त ।

लक्ष्मीलसत्कुचसरोरुहराजहंस लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ २ ॥

संसारदावदहनाकरभीकरोरुज्वालावलीभिरतिदग्धतनूरुहस्य ।

त्वत्पादपद्मसरसीरुहमागतस्य  लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ ३ ॥

संसारजालपतितस्य जगन्निवास सर्वेन्द्रियार्थबडिशाग्रझषोपमस्य ।

प्रोत्कम्पितप्रचुरतालुकमस्तकस्य लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ ४ ॥

संसारकूपमतिघोरमगाधमूलं संप्राप्य दुःखशतसर्पसमाकुलस्य ।

दीनस्य देव कृपया पदमागतस्य लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ ५ ॥

संसारभीकरकरीन्द्रकराभिघातनिष्पीड्यमानवपुषः सकलार्तिनाश।

प्राणप्रयाणभवभीतिसमाकुलस्य लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ ६ ॥

संसारसर्पविषदिग्धमहोग्रतीव्रदंष्ट्राग्रकोटिपरिदष्टविनष्टमूर्तेः ।

नागारिवाहन सुधाब्धिनिवास शौरे लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ ७ ॥

ākṛtisāmyācchālmalikusume sthalanalinatvabhramamakaroḥ
gandharasāviha kimu vidyete viphalaṁ bhrāmyasi bhṛśavirasesmin |
cetobhṛṅga bhramasi vṛthā bhavamarubhūmau virasāyāṁ
bhaja bhaja lakśmīnarasiṁhānaghapadasarasijamakarandam ||3||

srakcandanavanitādīnviṣayānsukhadānmatvā tatra viharase
gandhaphalīsadṛśā nanu temī bhogānantaraduḥkhakṛtaḥ syuḥ |
cetobhṛṅga bhramasi vṛthā bhavamarubhūmau virasāyāṁ
bhaja bhaja lakśmīnarasiṁhānaghapadasarasijamakarandam ||4||

tava hitamekaṁ vacanaṁ vakśye śṛṇu sukhakāmo yadi satataṁ
svapne dṛṣṭaṁ sakalaṁ hi mṛṣā jāgrati ca smara tadvaditi|
cetobhṛṅga bhramasi vṛthā bhavamarubhūmau virasāyāṁ
bhaja bhaja lakśmīnarasiṁhānaghapadasarasijamakarandam ||5||

|| iti śrīmatparamahaṁsaparivrājakācāryasya śrī govinda bhagavatpūjyapāda śiṣyasya śrīmacchaṁkara bhagavataḥ kṛtau lakśmīnṛsiṁha pañcaratnam sampūrṇam ||

## || lakṣmīnṛsiṁhakaruṇāvalambastotram ||

śrīmatpayonidhiniketanacakrapāṇe
bhogīndrabhogamaṇirājitapuṇyamūrte |
yogīśa śāśvata śaraṇya bhavābdhipota
lakṣmīnṛsiṁha mama dehi karāvalambam ||1||

brahmendrarudramarudarkakirīṭakoṭi-
saṅghaṭṭitāṅghrikamalāmalakāntikānta |
lakṣmīlasatkucasaroruharājahaṁsa
lakṣmīnṛsiṁha mama dehi karāvalambam ||2||

saṁsāradāvadahanākarabhīkaroru-
jvālāvalībhiratidagdhatanūruhasya |
tvatpādapadmasarasīruhamāgatasya
lakṣmīnṛsiṁha mama dehi karāvalambam ||3||

saṁsārajālapatitasya jagannivāsa
sarvendriyārthabaḍiśāgrajhaṣopamasya |
protkampitapracuratālukamastakasya
lakṣmīnṛsiṁha mama dehi karāvalambam ||4||

saṁsārakūpamatighoramagādhamūlaṁ
saṁprāpya duḥkhaśatasarpasamākulasya |
dīnasya deva kṛpayā padamāgatasya
lakṣmīnṛsiṁha mama dehi karāvalambam ||5||

saṁsārabhīkarakarīndrakarābhighāta-
niṣpīḍyamānavapuṣaḥ sakalārtināśa |
prāṇaprayāṇabhavabhītisamākulasya
lakṣmīnṛsiṁha mama dehi karāvalambam ||6||

saṁsārasarpaviṣadigdhamahogratīvra-
daṁṣṭrāgrakoṭiparidaṣṭavinaṣṭamūrteḥ |
nāgārivāhana sudhābdhinivāsa śaure
lakṣmīnṛsiṁha mama dehi karāvalambam ||7||

संसारवृक्षमघबीजमनन्तकर्मशाखायुतं करणपत्रमनङ्गपुष्पम् ।
आरुह्य दुःखफलितं चकितं दयालो लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥८॥
संसारसागरविशालकरालकालनक्रग्रहग्रसितनिग्रहविग्रहस्य ।
व्यग्रस्य रागनिचयोर्मिनिपीडितस्य लक्ष्मीनृसिंह मम देहि करावलम्बम्॥९॥
संसारसागरनिमज्जनमुह्यमानं दीनं विलोकय विभो करुणानिधे माम् ।
प्रह्लादखेदपरिहारपरावतार लक्ष्मीनृसिंह मम देहि करावलम्बम्॥१०॥
संसारघोरगहने चरतो मुरारे मारोग्रभीकरमृगप्रचुरार्दितस्य ।
आर्तस्य मत्सरनिदाघसुदुःखितस्य लक्ष्मीनृसिंह मम देहि करावलम्बम्॥११॥
बद्ध्वा गले यमभटा बहु तर्जयन्तः कर्षन्ति यत्र भवपाशशतैर्युतं माम्।
एकाकिनं परवशं चकितं दयालो लक्ष्मीनृसिंह मम देहि करावलम्बम्॥१२॥
लक्ष्मीपते कमलनाभ सुरेश विष्णो यज्ञेश यज्ञ मधुसूदन विश्वरूप ।
ब्रह्मण्य केशव जनार्दन वासुदेव लक्ष्मीनृसिंह मम देहि करावलम्बम्॥१३॥
एकेन चक्रमपरेण करेण शङ्खमन्येन सिन्धुतनयामवलम्ब्य तिष्ठन् ।
वामेतरेण वरदाभयपद्मचिह्नं लक्ष्मीनृसिंह मम देहि करावलम्बम्॥१४॥
अन्धस्य मे हृतविवेकमहाधनस्य चोरैर्महाबलिभिरिन्द्रियनामधेयैः।
मोहान्धकारकुहरे विनिपातितस्य लक्ष्मीनृसिंह मम देहि करावलम्बम्॥१५॥
प्रह्लादनारदपराशरपुण्डरीकव्यासादिभागवतपुङ्गवहृन्निवास ।
भक्तानुरक्तपरिपालनपारिजात लक्ष्मीनृसिंह मम देहि करावलम्बम्॥१६॥
लक्ष्मीनृसिंहचरणाब्जमधुव्रतेन स्तोत्रं कृतं शुभकरं भुवि शङ्करेण ।
ये तत्पठन्ति मनुजा हरिभक्तियुक्तास्ते यान्ति तत्पदसरोजमखण्डरूपम्॥१७॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ लक्ष्मीनृसिंहकरुणावलम्बस्तोत्रं संपूर्णम्॥

## ॥ शङ्कराचार्यपदावलम्ब स्तुति॥

saṁsāravṛkṣamaghabījamanantakarmaśākhāyutaṁ karaṇapatramanaṅgapuṣpam |
āruhya duḥkhaphalitaṁ cakitaṁ dayālo lakṣmīnṛsiṁha mama dehi karāvalambam ||8||

saṁsārasāgaraviśālakarālakālanakragrahagrasitanigrahavigrahasya |
vyagrasya rāganicayorminipīḍitasya lakṣmīnṛsiṁha mama dehi karāvalambam ||9||

saṁsārasāgaranimajjanamuhyamānaṁ dīnaṁ vilokaya vibho karuṇānidhe mām |
prahlādakhedaparihāraparāvatāra lakṣmīnṛsiṁha mama dehi karāvalambam ||10||

saṁsāraghoragahane carato murāre mārograbhīkaramṛgapracurārditasya |
ārtasya matsaranidāghasuduḥkhitasya lakṣmīnṛsiṁha mama dehi karāvalambam ||11||

baddhvā gale yamabhaṭā bahu tarjayantaḥ karṣanti yatra bhavapāśaśatairyutaṁ mām |
ekākinaṁ paravaśaṁ cakitaṁ dayālo lakṣmīnṛsiṁha mama dehi karāvalambam ||12||

lakṣmīpate kamalanābha sureśa viṣṇo yajñeśa yajña madhusūdana viśvarūpa |
brahmaṇya keśava janārdana vāsudeva lakṣmīnṛsiṁha mama dehi karāvalambam ||13||

ekena cakramapareṇa kareṇa śaṅkhamanyena sindhutanayāmavalambya tiṣṭhan |
vāmetareṇa varadābhayapadmacihnaṁ lakṣmīnṛsiṁha mama dehi karāvalambam ||14||

andhasya me hṛtavivekamahādhanasya corairmahābalibhirindriyanāmadheyaiḥ |
mohāndhakārakuhare vinipātitasya lakṣmīnṛsiṁha mama dehi karāvalambam ||15||

prahlādanāradaparāśarapuṇḍarīkavyāsādibhāgavatapuṅgavahṛnnivāsa |
bhaktānuruktaparipālanapārijāta lakṣmīnṛsiṁha mama dehi karāvalambam ||16||

lakṣmīnṛsiṁhacaraṇābjamadhuvratena stotraṁ kṛtaṁ śubhakaraṁ bhuvi śaṅkareṇa |
ye tatpaṭhanti manujā haribhaktiyuktāste yānti tatpadasarojamakhaṇḍarūpam ||17||

iti śrīmatparamahaṁsaparivrājakācāryasya śrīgovindabhagavatpūjyapādaśiṣyasya
śrīmacchaṅkarabhagavataḥ kṛtau lakṣmīnṛsiṁhakaruṇāvalambastotraṁ saṁpūrṇam ||

|| śaṅkarācāryapadāvalamba stuti ||

Recite these on day 4:

॥ ललितापञ्चरत्न॥

प्रातः स्मरामि ललितावदनारविन्दं बिम्बाधरं पृथुलमौक्तिकशोभिनासम् ।

आकर्णदीर्घनयनं मणिकुण्डलाढ्यं मन्दस्मितं मृगमदोज्ज्वलभालदेशम्॥ १ ॥

प्रातर्भजामि ललिताभुजकल्पवल्लीं रत्नाङ्गुळीयलसदङ्गुलिपल्लवाढ्याम् ।

माणिक्यहेमवलयाङ्गदशोभमानां पुण्ड्रेक्षुचापकुसुमेषुसृणीःदधानाम्॥ २ ॥

प्रातर्नमामि ललिताचरणारविन्दं भक्तेष्टदाननिरतं भवसिन्धुपोतम् ।

पद्मासनादिसुरनायकपूजनीयं पद्माङ्कुशध्वजसुदर्शनलाञ्छनाढ्यम्॥ ३ ॥

प्रातः स्तुवे परशिवां ललितां भवानीं त्रय्यन्तवेद्यविभवां करुणानवद्याम् ।

विश्वस्य सृष्टविलयस्थितिहेतुभूतां विश्वेश्वरीं निगमवाङ्गमनसातिदूराम्॥ ४॥

प्रातर्वदामि ललिते तव पुण्यनाम कामेश्वरीति कमलेति महेश्वरीति ।

श्रीशाम्भवीति जगतां जननी परेति वाग्देवतेति वचसा त्रिपुरेश्वरीति॥ ५॥

यः श्लोकपञ्चकमिदं ललिताम्बिकायाः सौभाग्यदं सुललितं पठति प्रभाते ।

तस्मै ददाति ललिता झटिति प्रसन्ना विद्यां श्रियं विमलसौख्यमनन्तकीर्तिम्॥ ६ ॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ ललिता पञ्चरत्नम् सम्पूर्णम्॥

॥ शारदाभुजंगप्रयाताष्टकम्॥

सुवक्षोजकुम्भां सुधापूर्णकुंभां प्रसादावलम्बां प्रपुण्यावलम्बाम् ।

सदास्येन्दुबिम्बां सदानोष्ठबिम्बां भजे शारदाम्बामजस्रं मदम्बाम्॥ १ ॥

कटाक्षे दयार्द्रां करे ज्ञानमुद्रां कलाभिर्विनिद्रां कलापैः सुभद्राम् ।

पुरस्त्रीं विनिद्रां पुरस्तुङ्गभद्रां भजे शारदाम्बामजस्रं मदम्बाम्॥ २॥

ललामाङ्कफालां लसद्गानलोलां स्वभक्तैकपालां यशःश्रीकपोलाम् ।

करे त्वक्षमालां कनत्प्रत्नलोलां भजे शारदाम्बामजस्रं मदम्बाम्॥ ३ ॥

सुसीमन्तवेणीं दृशा निर्जितैणीं रमत्कीरवाणीं नमद्वज्रपाणीम् ।

सुधामन्थरास्यां मुदा चिन्त्यवेणीं भजे शारदाम्बामजस्रं मदम्बाम्॥ ४॥

Recite these on day 4:

|| lalitāpañcaratna ||

prātaḥ smarāmi lalitāvadanāravindaṁ bimbādharaṁ pṛthulamauktikaśobhināsam |
ākarṇadīrghanayanaṁ maṇikuṇḍalāḍhyaṁ mandasmitaṁ mṛgamadojjvalabhāladeśam ||1||

prātarbhajāmi lalitābhujakalpavallīṁ ratnāṅguḻīyalasadaṅgulipallavāḍhyām |
māṇikyahemavalayāṅgadaśobhamānāṁ puṇḍrekṣucāpakusumeṣusṛṇīḥdadhānām ||2||

prātarnamāmi lalitācaraṇāravindaṁ bhakteṣṭadānaniratáṁ bhavasindhupotam |
padmāsanādisuranāyakapūjanīyaṁ padmāṅkuśadhvajasudarśanalāñchanāḍhyam ||3||

prātaḥ stuve paraśivāṁ lalitāṁ bhavānīṁ trayyantavedyavibhavāṁ karuṇānavadyām |
viśvasya sṛṣṭavilayasthitihetubhūtāṁ viśveśvarīṁ nigamavāṅgamanasātidūrām ||4||

prātarvadāmi lalite tava puṇyanāma kāmeśvarīti kamaleti maheśvarīti |
śrīśāmbhavīti jagatāṁ jananī pareti vāgdevateti vacasā tripureśvarīti ||5||

yaḥ ślokapañcakamidaṁ lalitāmbikāyāḥ saubhāgyadaṁ sulalitaṁ paṭhati prabhāte |
tasmai dadāti lalitā jhaṭiti prasannā vidyāṁ śriyaṁ vimalasaukhyamanantakīrtim ||6||

|| iti śrīmatparamahaṁsaparivrājakācāryasya śrīgovindabhagavatpūjyapādaśiṣyasya
śrīmacchaṅkarabhagavataḥ kṛtau lalitā pañcaratnam sampūrṇam ||

|| śāradābhujaṁgaprayātāṣṭakam ||

suvakṣojakumbhāṁ sudhāpūrṇakuṁbhāṁ prasādāvalambāṁ prapuṇyāvalambām |
sadāsyendubimbāṁ sadānoṣṭhabimbāṁ bhaje śāradāmbāmajasraṁ madambām ||1||

kaṭākṣe dayārdro kare jñānamudrāṁ kalābhirvinidrāṁ kalāpaiḥ subhadrām |
purastrīṁ vinidrāṁ purastuṅgabhadrāṁ bhaje śāradāmbāmajasraṁ madambām ||2||

lalāmāṅkaphālāṁ lasadgānalolāṁ svabhaktaikapālāṁ yaśaḥśrīkapolām |
kare tvakṣamālāṁ kanatpratnalolāṁ bhaje śāradāmbāmajasraṁ madambām ||3||

susīmantaveṇīṁ dṛśā nirjitaiṇīṁ ramatkīravāṇīṁ namadvajrapāṇīm |
sudhāmantharāsyāṁ mudā cintyaveṇīṁ bhaje śāradāmbāmajasraṁ madambām ||4||

सुशान्तां सुदेहां दृगन्ते कचान्तां लसत्सल्लताङ्गीमनन्तामचिन्त्याम् ।

स्मरेत्तापसैः सङ्गपूर्वस्थितां तां भजे शारदाम्बामजस्रं मदम्बाम्॥५॥

कुरङ्गे तुरंगे मृगेन्द्रे खगेन्द्रे मराले मदेभे महोक्षेऽधिरूढाम् ।

महत्यां नवम्यां सदा सामरूपां भजे शारदाम्बामजस्रं मदम्बाम्॥६॥

ज्वलत्कान्तिवह्निं जगन्मोहनाङ्गीं भजे मानसाम्भोजसुभ्रान्तभृङ्गीम् ।

निजस्तोत्रसंगीतनृत्यप्रभाङ्गीम् भजे शारदाम्बामजस्रं मदम्बाम्॥७॥

भवाम्भोजनेत्राजसंपूज्यमानां लसन्मन्दहासप्रभावक्त्रचिह्नाम् ।

चलच्चञ्चलाचारूताटङ्ककर्णौ भजे शारदाम्बामजस्रं मदम्बाम्॥८॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ शारदाभुजंगप्रयाताष्टक संपूर्णम्॥

## ॥ कनकधारा स्तोत्र॥

अङ्गं हरेः पुलकभूषणमाश्रयन्ती भृङ्गाङ्गनेव मुकुलाभरणं तमालम् ।

अङ्गीकृताखिलविभूतिरपाङ्गलीला माङ्गल्यदास्तु मम मङ्गळदेवतायाः॥१॥

मुग्धा मुहुर्विदधती वदने मुरारेः प्रेमत्रपाप्रणिहितानि गतागतानि ।

माला दृशोर्मधुकरीव महोत्पले या सा मे श्रियं दिशतु सागरसंभवायाः॥२॥

आमीलिताक्षमधिगम्य मुदा मुकुन्दं आनन्दकन्दमनिमेषमनङ्गतन्त्रम् ।

आकेकरस्थितकनीनिकपक्ष्मनेत्रं भूत्यै भवेन्मम भुजङ्गशयाङ्गनायाः॥३॥

बाह्वन्तरे मधुजितः श्रितकौस्तुभे या हारावलीव हरिनीलमयी विभाति ।

कामप्रदा भगवतोऽपि कटाक्षमाला कल्याणमावहतु मे कमलालयायाः॥४॥

कालाम्बुदाळिललितोरसि कैटभारेः धाराधरे स्फुरति या तडिदङ्गनेव ।

मातुस्समस्तजगतां महनीयमूर्तिः भद्राणि मे दिशतु भार्गवनन्दनायाः॥५॥

प्राप्तं पदं प्रथमतः खलु यत्प्रभावात् माङ्गल्यभाजि मधुमाथिनि मन्मथेन ।

मय्यापतेत्तदिह मन्थरमीक्षणार्धं मन्दालसं च मकरालयकन्यकायाः॥६॥

विश्वामरेन्द्रपदवीभ्रमदानदक्षं आनन्दहेतुरधिकं मुरविद्विषोऽपि।

ईषन्निषीदतु मयि क्षणमीक्षणार्द्धम् इन्दीवरोदरसहोदरमिन्दिरायाः॥७॥

suśāntāṁ sudehāṁ dṛgante kacāntāṁ lasatsallatāṅgīmanantāmacintyām |
smarettāpasaiḥ saṅgapūrvasthitāṁ tāṁbhaje śāradāmbāmajasraṁ madambām ||5||

kuraṅge turaṁge mṛgendre khagendre marāle madebhe mahokṣe'dhirūḍhām |
mahatyāṁ navamyāṁ sadā sāmarūpāṁ bhaje śāradāmbāmajasraṁ madambām ||6||

jvalatkāntivahniṁ jaganmohanāṅgīṁ bhaje mānasāmbhojasubhrāntabhṛṅgīm |
nijastotrasaṁgītanṛtyaprabhāṅgīm bhaje śāradāmbāmajasraṁ madambām ||7||

bhavāmbhojanetrājasaṁpūjyamānāṁ lasanmandahāsaprabhāvaktracihnām |
calaccañcalācārūtāṭaṅkakarṇo bhaje śāradāmbāmajasraṁ madambām ||8||

|| iti śrīmatparamahaṁsaparivrājakācāryasya śrīgovindabhagavatpūjyapādaśiṣyasya
śrīmacchaṁkarabhagavataḥ kṛtau śāradābhujaṁgaprayātāṣṭaka saṁpūrṇam ||

|| kanakadhārā stotra ||

aṅgaṁ hareḥ pulakabhūṣaṇamāśrayantī bhṛṅgāṅganeva mukulābharaṇaṁ tamālam |
aṅgīkṛtākhilavibhūtirapāṅgalīlā māṅgalyadāstu mama maṅgaḻadevatāyāḥ ||1||

mugdhā muhurvidadhatī vadane murāreḥ prematrapāpraṇihitāni gatāgatāni |
mālā dṛśormadhukarīva mahotpale yā sā me śriyaṁ diśatu sāgarasaṁbhavāyāḥ ||2||

āmīlitākṣamadhigamya mudā mukundaṁ ānandakandamanimeṣamanaṅgatantram |
ākekarasthitakanīnikapakṣmanetraṁ bhūtyai bhavenmama bhujaṅgaśayāṅganāyāḥ ||3||

bāhvantare madhujitaḥ śritakaustubhe yā hārāvalīva harinīlamayī vibhāti |
kāmapradā bhagavato'pi kaṭākṣamālā kalyāṇamāvahatu me kamalālayāyāḥ ||4||

kālāmbudāḻilalitorasi kaiṭabhāreḥ dhārādhare sphurati yā taḍidaṅganeva |
mātussamastajagatāṁ mahanīyamūrtiḥ bhadrāṇi me diśatu bhārgavanandanāyāḥ ||5||

prāptaṁ padaṁ prathamataḥ khalu yatprabhāvāt māṅgalyabhāji madhumāthini manmathena |
mayyāpatettadiha mantharamīkṣaṇārdhaṁ mandālasaṁ ca makarālayakanyakāyāḥ ||6||

viśvāmarendrapadavībhramadānadakṣaṁ ānandaheturadhikaṁ muravidviṣo'pi |
īṣanniṣīdatu mayi kṣaṇamīkṣaṇārddham indīvarodarasahodaramindirāyāḥ ||7||

iṣṭā viśiṣṭamatayo'pi yayā dayārdra dṛṣṭyā triviṣṭapapadaṁ sulabhaṁ labhante |
dṛṣṭiḥ prahṛṣṭakamalodaradīptiriṣṭāṁ puṣṭiṁ kṛṣīṣṭa mama puṣkaraviṣṭarāyāḥ ||8||

इष्टा विशिष्टमतयोऽपि यया दयार्द्र दृष्ट्या त्रिविष्टपपदं सुलभं लभन्ते ।

दृष्टिः प्रहृष्टकमलोदरदीप्तिरिष्टां पुष्टिं कृषीष्ट मम पुष्करविष्टरायाः ॥ ८ ॥

दद्याद्दयानुपवनो द्रविणाम्बुधारां अस्मिन्नकिञ्चनविहङ्गशिशौ विषण्णे ।

दुष्कर्मघर्ममपनीय चिराय दूरं नारायणप्रणयिनीनयनाम्बुवाहः ॥ ९ ॥

गीर्देवतेति गरुडध्वजसुन्दरीति शाकम्बरीति शशिशेखरवल्लभेति ।

सृष्टिस्थितिप्रलयकेलिषु संस्थिता या तस्यै नमस्त्रिभुवनैकगुरोस्तरुण्यै ॥ १० ॥

श्रुत्यै नमोऽस्तु शुभकर्मफलप्रसूत्यै रत्यै नमोऽस्तु रमणीयगुणार्णवायै ।

शक्त्यै नमोऽस्तु शतपत्रनिकेतनायै पुष्ट्यै नमोऽस्तु पुरुषोत्तमवल्लभायै ॥ ११ ॥

नमोऽस्तु नालीकनिभाननायै नमोऽस्तु दुग्धोदधिजन्मभूम्यै ।

नमोऽस्तु सोमामृतसोदरायै नमोऽस्तु नारायणवल्लभायै ॥ १२ ॥

नमोऽस्तु हेमाम्बुजपीठिकायै नमोऽस्तु भूमण्डलनायिकायै ।

नमोऽस्तु देवादिदयापरायै नमोऽस्तु शार्ङ्गायुधवल्लभायै ॥ १३ ॥

नमोऽस्तु देव्यै भृगुनन्दनायै नमोऽस्तु विष्णोरुरसि स्थितायै ।

नमोऽस्तु लक्ष्म्यै कमलालयायै नमोऽस्तु दामोदरवल्लभायै ॥ १४ ॥

नमोऽस्तु कान्त्यै कमलेक्षणायै नमोऽस्तु भूत्यै भुवनप्रसूत्यै ।

नमोऽस्तु देवादिभिरर्चितायै नमोऽस्तु नन्दात्मजवल्लभायै ॥ १५ ॥

सम्पत्कराणि सकलेन्द्रियनन्दनानि साम्राज्यदानविभवानि सरोरुहाक्षि ।

त्वद्वन्दनानि दुरिताहरणोद्यतानि मामेव मातरनिशं कलयन्तु मान्ये ॥ १६ ॥

यत्कटाक्षसमुपासनाविधिः सेवकस्य सकलार्थसंपदः ।

संतनोति वचनाङ्गमानसैः त्वां मुरारिहृदयेश्वरीं भजे ॥ १७ ॥

सरसिजनिलये सरोजहस्ते धवळतमांशुकगन्धमाल्यशोभे ।

भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ १८ ॥

दिग्घस्तिभिः कनककुंभमुखावसृष्ट स्वर्वाहिनी विमलचारुजलाप्लुताङ्गीम् ।

प्रातर्नमामि जगतां जननीमशेष लोकाधिनाथगृहिणीममृताब्धिपुत्रीम् ॥ १९ ॥

कमले कमलाक्षवल्लभे त्वं करुणापूरतरङ्गितैरपाङ्गैः ।

अवलोकय मामकिञ्चनानां प्रथमं पात्रमकृत्रिमं दयायाः ॥ २० ॥

dadyāddayānupavano draviṇāmbudhārāṁ asminnakiñcanavihaṅgaśiśau viṣaṇṇe |
duṣkarmagharmamapanīya cirāya dūraṁ nārāyaṇapraṇayinīnayanāmbuvāhaḥ ||9||

gīrdevateti garuḍadhvajasundarīti śākambarīti śaśiśekharavallabheti |
sṛṣṭisthitipralayakeliṣu saṁsthitā yā tasyai namastribhuvanaikagurostaruṇyai ||10||

śrutyai namo'stu śubhakarmaphalaprasūtyai ratyai namo'stu ramaṇīyaguṇārṇavāyai |
śaktyai namo'stu śatapatraniketanāyai puṣṭyai namo'stu puruṣottamavallabhāyai ||11||

namo'stu nālīkanibhānanāyai namo'stu dugdhodadhijanmabhūmyai |
namo'stu somāmṛtasodarāyai namo'stu nārāyaṇavallabhāyai ||12||

namo'stu hemāmbujapīṭhikāyai namo'stu bhūmaṇḍalanāyikāyai |
namo'stu devādidayāparāyai namo'stu śārṅgāyudhavallabhāyai ||13||
namo'stu  devyai bhṛgunandanāyai namo'stu viṣṇorurasi sthitāyai |
namo'stu lakṣmyai kamalālayāyai namo'stu dāmodaravallabhāyai ||14||

namo'stu kāntyai kamalekṣaṇāyai namo'stu bhūtyai bhuvanaprasūtyai |
namo'stu devādibhirarcitāyai namo'stu nandātmajavallabhāyai ||15||

sampatkarāṇi sakalendriyanandanāni sāmrājyadānavibhavāni saroruhākṣi |
tvadvandanāni duritāharaṇodyatāni māmeva mātaraniśaṁ kalayantu mānye ||16||

yatkaṭākṣasamupāsanāvidhiḥ sevakasya sakalārthasaṁpadaḥ |
saṁtanoti vacanāṅgamānasaiḥ tvāṁ murārihṛdayeśvarīṁ bhaje ||17||

sarasijanilaye sarojahaste dhavaḷatamāṁśukagandhamālyaśobhe |
bhagavati harivallabhe manojñe tribhuvanabhūtikari prasīda mahyam ||18||

digghastibhiḥ kanakakuṁbhamukhāvasṛṣṭa svarvāhinī vimalacārujalāplutāṅgīm |
prātarnamāmi jagatāṁ jananīmaśeṣa lokādhināthagṛhiṇīmamṛtābdhiputrīm ||19||

kamale kamalākṣavallabhe tvaṁ karuṇāpūrataraṅgitairapāṅgaiḥ |
avalokaya māmakiñcanānāṁ prathamaṁ pātramakṛtrimaṁ dayāyāḥ ||20||

देवि प्रसीद जगदीश्वरि लोकमातः कल्यानगात्रि कमलेक्षणजीवनाथे ।
दारिद्र्यभीतिहृदयं शरणागतं माम् आलोकय प्रतिदिनं सदयैरपाङ्गैः ॥ २१ ॥
स्तुवन्ति ये स्तुतिभिरमीभिरन्वहं त्रयीमयीं त्रिभुवनमातरं रमाम् ।
गुणाधिका गुरुतरभाग्यभागिनो भवन्ति ते भुवि बुधभाविताशयाः ॥ २२ ॥
॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ कनकधारास्तोत्रं संपूर्णम् ॥

## ॥ श्रीमद्जगद्गुरुशंकरभगवद्पूज्यपादाचार्यस्तवः ॥

मुदा करेण पुस्तकं दधानमीशरूपिणं तथाऽपरेण मुद्रिकां नमत्तमोविनाशिनीम् ।
कुसुंभवाससावृतं विभूतिभासिफालकं नताघनाशने रतं नमामि शङ्करं गुरुम् ॥ १ ॥
पराशरात्मजप्रियं पवित्रितक्षमातलं पुराणसारवेदिनं सनंदनादिसेवितम् ।
प्रसन्नवक्त्रपंकजं प्रपन्नलोकरक्षकं प्रकाशिताद्वितीयतत्त्वमाश्रयामि देशिकं ॥ २ ॥
सुधांशुशेखरार्चकं सुधीन्द्रसेव्यपादुकं सुतादिमोहनाशकं सुशान्तिदान्तिदायकम् ।
समस्तवेदपारगं सहस्रसूर्यभासुरं समाहिताखिलेन्द्रियं सदा भजामि शङ्करम् ॥ ३ ॥
यमीन्द्रचक्रवर्तिनं यमादियोगवेदिनं यथार्थतत्त्वबोधकं यमान्तकात्मजार्चकम् ।
यमेव मुक्तिकांक्षया समाश्रयन्ति सज्जना नमाम्यहं सदा गुरुं तमेव शङ्कराभिधम् ॥ ४ ॥
स्वबाल्य एव निर्भरं य आत्मनो दयालुतां दरिद्रविप्रमन्दिरे सुवर्णवृष्टिमानयन् ।
प्रदर्श्य विस्मयाम्बुधौ न्यमज्जयत् समान् जनान् स एव शङ्करः सदा जगद्गुरुर्गतिर्मम ॥ ५ ॥
यदीयपुण्यजन्मना प्रसिद्धिमाप कालटी यदीयशिष्यतां व्रजन् स तोटकोऽपि पप्रथे ।
य एव सर्वदेहिनां विमुक्तिमार्गदर्शको नराकृतिं सदाशिवं तमाश्रयामि सद्गुरुम् ॥ ६ ॥
सनातनस्य वर्त्मनः सदैव पालनाय यः चतुर्दिशासु सन्मठान् चकार लोकविश्रुतान् ।
विभाण्डकात्मजाश्रमादिसुस्थलेषु पावनान् तमेव लोकशङ्करं नमामि शङ्करं गुरुम् ॥ ७ ॥
यदीयहस्तवारिजातसुप्रतिष्ठिता सती प्रसिद्धशृङ्गभूधरे सदा प्रशान्तिभासुरे ।
स्वभक्तपालनव्रता विराजते हि शारदा स शङ्करः कृपानिधिः करोतु मामनेनसम् ॥ ८ ॥
इमं स्तवं जगद्गुरोर्गुणानुवर्णनात्मकं समादरेण यः पठेदनन्यभक्तिसंयुतः ।
समाप्नुयात् समीहितं मनोरथं नरोऽचिरात् दयानिधेः स शङ्करस्य सद्गुरोः प्रसादतः ॥ ९ ॥
॥ इति श्रीभारतीतीर्थ महास्वामिभिः विरचितं श्रीमद्जगद्गुरुशंकरभगवद्पूज्यपादाचार्यस्तवः संपूर्णम् ॥

devi prasīda jagadīśvari lokamātaḥ kalyānagātri kamalekṣaṇajīvanāthe |
dāridryabhītihṛdayaṁ śaraṇāgataṁ mām ālokaya pratidinaṁ sadayairapāṅgaiḥ ||21||

stuvanti ye stutibhiramībhiranvahaṁ trayīmayīṁ tribhuvanamātaraṁ ramām |
guṇādhikā gurutarabhāgyabhāgino bhavanti te bhuvi budhabhāvitāśayāḥ ||22||

|| iti śrīmatparamahaṁsaparivrājakācāryasya śrīgovindabhagavatpūjyapādaśiṣyasya
śrīmacchaṅkarabhagavataḥ kṛtau kanakadhārāstotraṁ saṁpūrṇam ||

## || śrīmadjagadguruśaṁkarabhagavadpūjyapādācāryastavaḥ ||

mudā kareṇa pustakaṁ dadhānamīśarūpiṇaṁ
tathā'pareṇa mudrikāṁ namattamovināśinīm |
kusuṁbhavāsasāvṛtaṁ vibhūtibhāsiphālakaṁ
natāghanāśane rataṁ namāmi śaṅkaraṁ gurum ||1||

parāśarātmajapriyaṁ pavitritakṣamātalaṁ
purāṇasāravedinaṁ sanaṁdanādisevitam |
prasannavaktrapaṁkajaṁ prapannalokarakṣakaṁ
prakāśitādvitīyatattvamāśrayāmi deśikaṁ ||2||

sudhāṁśuśekhārārcakaṁ sudhīndrasevyapādukaṁ
sutādimohanāśakaṁ suśāntidāntidāyakam |
samastavedapāragaṁ sahasrasūryabhāsuraṁ
samāhitākhilendriyaṁ sadā bhajāmi śaṅkaram ||3||

yamīndracakravartinaṁ yamādiyogavedinaṁ
yathārthatattvabodhakaṁ yamāntakātmajārcakam |
yameva muktikāṁkṣayā samāśrayanti sajjanā
namāmyahaṁ sadā guruṁ tameva śaṅkarābhidham ||4||

svabālya eva nirbharaṁ ya ātmano dayālutāṁ
daridravipramandire suvarṇavṛṣṭimānayan |
pradarśya vismayāmbudhau nyamajjayat samān janān
sa eva śaṅkaraḥ sadā jagadgururgatirmama ||5||

yadīyapuṇyajanmanā prasiddhimāpa kālaṭī
yadīyaśiṣyatāṁ vrajan sa toṭako'pi paprathe |
ya eva sarvadehināṁ vimuktimārgadarśako
narākṛtiṁ sadāśivaṁ tamāśrayāmi sadgurum ||6||

sanātanasya vartmanaḥ sadaiva pālanāya yaḥ
caturdiśāsu sanmaṭhān cakāra lokaviśrutān |
vibhāṇḍakātmajāśramādisusthaleṣu pāvanān
tameva lokaśaṅkaraṁ namāmi śaṅkaraṁ gurum ||7||

yadīyahastavārijātasupratiṣṭhitā satī
prasiddhaśṛṅgabhūdhare sadā praśāntibhāsure |
svabhaktapālanavratā virājate hi śāradā
sa śaṅkaraḥ kṛpānidhiḥ karotu māmanenasam ||8||

imaṁ stavaṁ jagadgurorguṇānuvarṇanātmakaṁ
samādareṇa yaḥ paṭhedananyabhaktisaṁyutaḥ |
samāpnuyāt samīhitaṁ manorathaṁ naro'cirāt
dayānidheḥ sa śaṅkarasya sadguroḥ prasādataḥ ||9||

|| iti śrībhāratītīrtha mahāsvāmibhiḥ viracitaṁ
śrīmadjagadguruśaṁkarabhagavadpūjyapādācāryastavaḥ saṁpūrṇam ||

Recite these on day 5:

॥ दक्षिणामूर्त्यष्टकम्॥

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।
यः साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ १ ॥
बीजस्यान्तरिवाङ्कुरो जगदिदं प्राङ्निर्विकल्पं पुनः मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतम् ।
मायावीव विजृम्भयत्यपि महायोगीव यः स्वेच्छया तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ २ ॥
यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थकं भासते साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान् ।
यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवाम्भोनिधौ तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ ३ ॥
नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते ।
जानामीति तमेव भान्तमनुभात्येतत्समस्तं जगत् तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ ४ ॥
देहं प्राणमपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदुः स्त्रीबालान्धजडोपमास्त्वहमिति भ्रान्ता भृशं वादिनः ।
मायाशक्तिविलासकल्पितमहा व्यामोहसंहारिणे तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ ५ ॥
राहुग्रस्तदिवाकरेन्दुसदृशो मायासमाच्छादनात् सन्मात्रः करणोपसंहरणतो योऽभूत्सुषुप्तः पुमान् ।
प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ ६ ॥
बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि व्यावृत्तास्वनुवर्तमानमहमित्यन्तः स्फुरन्तं सदा ।
स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ ७ ॥
विश्वं पश्यति कार्यकारणतया स्वस्वामिसंबन्धतः शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः।
स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामितः तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ ८ ॥
भूरम्भांस्यनलोऽनिलोऽम्बरमहर्नाथो हिमांशुः पुमान् इत्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।
नान्यत्किञ्चन विद्यते विमृशतां यस्मात्परस्माद्विभोः तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ ९ ॥
सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिन् स्तवे तेनास्य श्रवणात्तदर्थमननाद्ध्यानाच्च सङ्कीर्तनात् ।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः सिद्ध्येत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम्॥ १० ॥
॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ दक्षिणामूर्त्यष्टकम् संपूर्णम्॥

Recite these on day 5:

|| dakṣiṇāmūrtyaṣṭakam ||

viśvaṁ darpaṇadṛśyamānanagarītulyaṁ nijāntargataṁ
paśyannātmani māyayā bahirivodbhūtaṁ yathā nidrayā |
yaḥ sākṣātkurute prabodhasamaye svātmānamevādvayaṁ
tasmai śrīgurumūrtaye nama idaṁ śrīdakṣiṇāmūrtaye ||1||

bījasyāntarivāṅkuro jagadidaṁ prāṅnirvikalpaṁ punaḥ
māyākalpitadeśakālakalanāvaicitryacitrīkṛtam |
māyāvīva vijṛmbhayatyapi mahāyogīva yaḥ svecchayā
tasmai śrīgurumūrtaye nama idaṁ śrīdakṣiṇāmūrtaye ||2||

yasyaiva sphuraṇaṁ sadātmakamasatkalpārthakaṁ bhāsate
sākṣāttattvamasīti vedavacasā yo bodhayatyāśritān |
yatsākṣātkaraṇādbhavenna punarāvṛttirbhavāmbhonidhau
tasmai śrīgurumūrtaye nama idaṁ śrīdakṣiṇāmūrtaye ||3||

nānācchidraghaṭodarasthitahādīpaprabhābhāsvaraṁ
jñānaṁ yasya tu cakṣurādikaraṇadvārā bahiḥ spandate |
jānāmīti tameva bhāntamanubhātyetatsamastaṁ jagat
tasmai śrīgurumūrtaye nama idaṁ śrīdakṣiṇāmūrtaye ||4||

dehaṁ prāṇamapīndriyāṇyapi calāṁ buddhiṁ ca śūnyaṁ viduḥ
strībālāndhajaḍopamāstvahamiti bhrāntā bhṛśaṁ vādinaḥ |
māyāśaktivilāsakalpitamahā vyāmohasaṁhāriṇe
tasmai śrīgurumūrtaye nama idaṁ śrīdakṣiṇāmūrtaye ||5||

rāhugrastadivākarendusadṛśo māyāsamācchādanāt
sanmātraḥ karaṇopasaṁharaṇato yo'bhūtsuṣuptaḥ pumān |
prāgasvāpsamiti prabodhasamaye yaḥ pratyabhijñāyate
tasmai śrīgurumūrtaye nama idaṁ śrīdakṣiṇāmūrtaye ||6||

bālyādiṣvapi jāgradādiṣu tathā sarvāsvavasthāsvapi
vyāvṛttāsvanuvartamānamahamityantaḥ sphurantaṁ sadā |
svātmānaṁ prakaṭīkaroti bhajatāṁ yo mudrayā bhadrayā
tasmai śrīgurumūrtaye nama idaṁ śrīdakṣiṇāmūrtaye ||7||

viśvaṁ paśyati kāryakāraṇatayā svasvāmisaṁbandhataḥ
śiṣyācāryatayā tayaiva pitṛputrādyātmanā bhedataḥ |
svapne jāgrati vā ya eṣa puruṣo māyāparibhrāmitaḥ
tasmai śrīgurumūrtaye nama idaṁ śrīdakṣiṇāmūrtaye ||8||

bhūrambhāṁsyanalo'nilo'mbaramaharnātho himāṁśuḥ pumān
ityābhāti carācarātmakamidaṁ yasyaiva mūrtyaṣṭakam |
nānyatkiñcana vidyate vimṛśatāṁ yasmātparasmādvibhoḥ
tasmai śrīgurumūrtaye nama idaṁ śrīdakṣiṇāmūrtaye ||9||

sarvātmatvamiti sphuṭīkṛtamidaṁ yasmādamuṣmin stave
tenāsya śravaṇāttadarthamananāddhyānācca saṅkīrtanāt |
sarvātmatvamahāvibhūtisahitaṁ syādīśvaratvaṁ svataḥ
siddhyettatpunaraṣṭadhā pariṇataṁ caiśvaryamavyāhatam ||10||

|| iti śrīmatparamahaṁsaparivrājakācāryasya śrīgovindabhagavatpūjyapādaśiṣyasya
śrīmacchaṅkarabhagavataḥ kṛtau dakṣiṇāmūrtyaṣṭakam saṁpūrṇam ||

॥ दक्षिणामूर्ति स्तोत्रम्॥

उपासकानां यदुपासनीयमुपात्तवासं वटशाखिमूले ।
तद्धाम दाक्षिण्यजुषा स्वमूर्त्या जागर्तु चित्ते मम बोधरूपम्॥ १॥
अद्राक्षमक्षीणदयानिधानमाचार्यमाद्यं वटमूलभागे ।
मौनेन मन्दस्मितभूषितेन महर्षिलोकस्य तमो नुदन्तम्॥ २॥
विद्रावितारशेषतमोगणेन मुद्राविशेषेण मुहुर्मुनीनाम् ।
निरस्य मायां दयया विधत्ते देवो महांस्तत्त्वमसीति बोधम्॥ ३॥
अपारकारुण्यसुधातरङ्गैरपाङ्गपातैरवलोकयन्तम् ।
कठोरसंसारनिदाघतप्तान्मुनीनहं नौमि गुरुं गुरूणाम्॥ ४॥
ममाद्यदेवो वटमूलवासी कृपाविशेषात्कृतसन्निधानः ।
ओंकाररूपामुपदिश्य विद्यामाविद्यकध्वान्तमपाकरोतु॥ ५॥
कलाभिरिन्दोरिव कल्पिताङ्गं मुक्ताकलापैरिव बद्धमूर्तिम् ।
आलोकये देशिकमप्रमेयमनाद्यविद्यातिमिरप्रभातम्॥ ६॥
स्वदक्षजानुस्थितवामपादं पादोदरालंकृतयोगपट्टम् ।
अपस्मृतेराहितपादमङ्गे प्रणौमि देवं प्रणिधानवन्तम्॥ ७॥
तत्त्वार्थमन्तेवसतामृषीणां युवाऽपि यः सन्नुपदेष्टुमीष्टे ।
प्रणौमि तं प्राक्तनपुण्यजालैराचार्यमाश्चर्यगुणाधिवासम्॥ ८॥
एकेन मुद्रां परशुं करेण करेण चान्येन मृगं दधानः ।
स्वजानुविन्यस्तकरः पुरस्तादाचार्यचूडामणिराविरस्तु॥ ९॥
आलेपवन्तं मदनाङ्गभूत्या शार्दूलकृत्त्या परिधानवन्तम् ।
आलोकये कञ्चन देशिकेन्द्रमज्ञानवाराकरवाडवाग्निम्॥ १०॥
चारुस्मितं सोमकलावतंसं वीणाधरं व्यक्तजटाकलापम् ।
उपासते केचन योगिनस्त्वामुपात्तनादानुभवप्रमोदम्॥ ११॥
उपासते यं मुनयः शुकाद्या निराशिषो निर्ममताधिवासाः।
तं दक्षिणामूर्तितनुं महेशमुपास्महे मोहमहार्तिशान्त्यै॥ १२॥

|| dakṣiṇāmūrti stotram ||

upāsakānāṁ yadupāsanīyamupāttavāsaṁ vaṭaśākhimūle |
taddhāma dākṣiṇyajuṣā svamūrtyā jāgartu citte mama bodharūpam ||1||

adrākṣamakṣīṇadayānidhānamācāryamādyaṁ vaṭamūlabhāge |
maunena mandasmitabhūṣitena maharṣilokasya tamo nudantam ||2||

vidrāvitāśeṣatamogaṇena mudrāviśeṣeṇa muhurmunīnām |
nirasya māyāṁ dayayā vidhatte devo mahāṁstattvamasīti bodham ||3||

apārakāruṇyasudhātaraṅgairapāṅgapātairavalokayantam |
kaṭhorasaṁsāranidāghataptānmunīnahaṁ naumi guruṁ gurūṇām ||4||

mamādyadevo vaṭamūlavāsī kṛpāviśeṣātkṛtasannidhānaḥ |
oṁkārarūpāmupadiśya vidyāmāvidyakadhvāntamapākarotu ||5||

kalābhirindoriva kalpitāṅgaṁ muktākalāpairiva baddhamūrtim |
ālokaye deśikamaprameyamanādyavidyātimiraprabhātam ||6||

svadakṣajānusthitavāmapādaṁ pādodarālaṁkṛtayogapaṭṭam |
apasmṛterāhitapādamaṅge praṇaumi devaṁ praṇidhānavantam ||7||

tattvārthamantevasatāmṛṣīṇāṁ yuvā'pi yaḥ sannupadeṣṭumīṣṭe |
praṇaumi taṁ prāktanapuṇyajālairācāryamāścaryaguṇādhivāsam ||8||

ekena mudrāṁ paraśuṁ kareṇa kareṇa cānyena mṛgaṁ dadhānaḥ |
svajānuvinyastakaraḥ purastādācāryacūḍāmaṇirāvirastu ||9||

ālepavantaṁ madanāṅgabhūtyā śārdūlakṛttyā paridhānavantam |
ālokaye kañcana deśikendramajñānavārākaravāḍavāgnim ||10||

cārusmitaṁ somakalāvataṁsaṁ vīṇādharaṁ vyaktajaṭākalāpam |
upāsate kecana yoginastvāmupāttanādānubhavapramodam ||11||

upāsate yaṁ munayaḥ śukādyā nirāśiṣo nirmamatādhivāsāḥ |
taṁ dakṣiṇāmūrtitanuṁ maheśamupāsmahe mohamahārtiśāntyai ||12||

कान्त्या निन्दितकुन्दकन्दलवपुर्न्यग्रोधमूले वसन्कारुण्यामृतवारिभिर्मुनिजनं संभावयन्वीक्षितैः।
मोहध्वान्तविभेदनं विरचयन्बोधेन तत्तादृशा देवस्तत्त्वमसीति बोधयतु मां मुद्रावता पाणिना॥ १३॥
अगौरगात्रैरललाटनेत्रैरशान्तवेषैरभुजङ्गभूषैः। अबोधमुद्रैरनपास्तनिद्रैरपूर्णकामैरमरैरलं नः॥ १४॥
दैवतानि कति सन्ति चावनौ नैव तानि मनसो मतानि मे ।दीक्षितं जडधियामनुग्रहे दक्षिणाभिमुखमेव दैवतम्॥ १५॥
मुदिताय मुग्धशशिनावतंसिने भसितावलेपरमणीयमूर्तये ।
जगदीन्द्रजालरचनापटीयसे महसे नमोऽस्तु वटमूलवासिने॥ १६॥
व्यालम्बिनीभिः परितो जटाभिः कलावशेषेण कलाधरेण।
पश्यँल्ललाटेन मुखेन्दुना च प्रकाशसे चेतसि निर्मलानाम्॥ १७॥
उपासकानां त्वमुमासहायः पूर्णेन्दुभावं प्रकटीकरोषि ।यदद्य ते दर्शनमात्रतो मे द्रवत्यहो मानसचन्द्रकान्तः॥ १८॥
यस्ते प्रसन्नामनुसन्दधानो मूर्तिं मुदा मुग्धशशाङ्कमौलेः ।
ऐश्वर्यमायुर्लभते च विद्यामन्ते च वेदान्तमहारहस्यम्॥ १९॥
॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ दक्षिणामूर्तिस्तोत्रं संपूर्णम्॥

## ॥ रामभुजंगप्रयात स्तोत्र॥

विशुद्धं परं सच्चिदानन्दरूपम् गुणाधारमाधारहीनं वरेण्यम् ।
महान्तं विभान्तं गुहान्तं गुणान्तं सुखान्तं स्वयं धाम रामं प्रपद्ये॥ १॥
शिवं नित्यमेकं विभुं तारकाख्यं सुखाकारमाकारशून्यं सुमान्यं ।
महेशं कलेशं सुरेशं परेशं नरेशं निरीशं महीशं प्रपद्ये॥ २॥
यदावर्णयत्कर्णमूलेऽन्तकाले शिवो राम रामेति रामेति काश्याम् ।
तदेकं परं तारकब्रह्मरूपं भजेऽहं भजेऽहं भजेऽहं भजेऽहम्॥ ३॥
महारत्नपीठे शुभे कल्पमूले सुखासीनमादित्यकोटिप्रकाशम् ।
सदा जानकीलक्ष्मणोपेतमेकं सदा रामचन्द्रम् भजेऽहं भजेऽहम् ॥४॥
क्वणद्रत्नमन्जीरपादारविन्दम् लसन्मेखलाचारुपीताम्बराढ्यम्।
महारत्नहारोल्लसत्कौस्तुभाङ्गं नदच्चंचरीमंजरीलोलमालम्॥ ५॥
लसच्चन्द्रिकास्मेरशोणाधराभम् समुद्यत्पतङ्गेन्दुकोटिप्रकाशम् ।
नमद्ब्रह्मरुद्रादिकोटीररत्नस्फुरत्कान्तिनीराजनाराधिताङ्घ्रिम्॥ ६॥

kāntyā ninditakundakandalavapurnyagrodhamūle vasa -
nkāruṇyāmṛtavāribhirmunijanaṁ saṁbhāvayanvīkṣitaiḥ |
mohadhvāntavibhedanaṁ viracayanbodhena tattādṛśā
devastattvamasīti bodhayatu māṁ mudrāvatā pāṇinā ||13||

agauragātrairalalāṭanetrairaśāntaveṣairabhujaṅgabhūṣaiḥ |
abodhamudrairanapāstanidrairapūrṇakāmairamarairalaṁ naḥ ||14||

daivatāni kati santi cāvanau naiva tāni manaso matāni me |
dīkṣitaṁ jaḍadhiyāmanugrahe dakṣiṇābhimukhameva daivatam ||15||

muditāya mugdhaśaśināvataṁsine bhasitāvaleparamaṇīyamūrtaye |
jagadīndrajālaracanāpaṭīyase mahase namo'stu vaṭamūlavāsine ||16||

vyālambinībhiḥ parito jaṭābhiḥ kalāvaśeṣeṇa kalādhareṇa |
paśya৻llalāṭena mukhendunā ca prakāśase cetasi nirmalānām ||17||

upāsakānāṁ tvamumāsahāyaḥ pūrṇendubhāvaṁ prakaṭīkaroṣi |
yadadya te darśanamātrato me dravatyaho mānasacandrakāntaḥ ||18||

yaste prasannāmanusandadhāno mūrtiṁ mudā mugdhaśaśāṅkamauleḥ |
aiśvaryamāyurlabhate ca vidyāmante ca vedāntamahārahasyam ||19||

|| iti śrīmatparamahaṁsaparivrājakācāryasya śrīgovindabhagavatpūjyapādaśiṣyasya
śrīmacchaṅkarabhagavataḥ kṛtau dakṣiṇāmūrtistotraṁ saṁpūrṇam ||

|| rāmabhujaṁgaprayāta stotra ||

viśuddhaṁ paraṁ saccidānandarūpam guṇādhāramādhārahīnaṁ vareṇyam |
mahāntaṁ vibhāntaṁ guhāntaṁ guṇāntaṁ sukhāntaṁ svayaṁ dhāma rāmaṁ prapadye ||1||

śivaṁ nityamekaṁ vibhuṁ tārakākhyaṁ sukhākāramākāraśūnyaṁ sumānyaṁ |
maheśaṁ kaleśaṁ sureśaṁ pareśaṁ nareśaṁ nirīśaṁ mahīśaṁ prapadye ||2||

yadāvarṇayatkarṇamūle'ntakāle śivo rāma rāmeti rāmeti kāśyām |
tadekaṁ paraṁ tārakabrahmarūpaṁ bhaje'haṁ bhaje'haṁ bhaje'haṁ bhaje'ham ||3||

mahāratnapīṭhe śubhe kalpamūle sukhāsīnamādityakoṭiprakāśam |
sadā jānakīlakśmaṇopetamekaṁ sadā rāmacandram bhaje'haṁ bhaje'ham ||4||

kvaṇadratnamanjīrapādāravindam lasanmekhalācārupītāmbarāḍhyam |
mahāratnahārollasatkaustubhāṅgaṁ nadaccaṁcarīmaṁjarīlolamālam ||5||

lasaccandrikāsmeraśoṇādharābham samudyatpataṅgendukoṭiprakāśam |
namadbrahmarudrādikoṭīraratnasphuratkāntinīrājanārādhitānghrim ||6||

पुरः प्राञ्जलीनाञ्जनेयादिभक्तान् स्वचिन्मुद्रया भद्रया बोधयन्तम् ।
भजेऽहं भजेऽहं सदा रामचन्द्रं त्वदन्यं न मन्ये न मन्ये न मन्ये॥७॥
यदा मत्समीपं कृतान्तः समेत्य प्रचण्डप्रतापैर्भटैर्भीषयेन्माम् ।
तदाविष्करोषि त्वदीयं स्वरूपं तदापत्प्रणाशं सकोदण्डबाणम्॥८॥
निजे मानसे मन्दिरे संनिधेहि प्रसीद प्रसीद प्रभो रामचन्द्र ।
ससौमित्रिणा कैकेयीनन्दनेन स्वशक्त्यानुभक्त्या च संसेव्यमान॥९॥
स्वभक्ताग्रगण्यैः कपीशैर्महीशैरनीकैरनेकैश्च राम प्रसीद ।
नमस्ते नमोऽस्त्वीश राम प्रसीद प्रशाधि प्रशाधि प्रकाशं प्रभो माम्॥१०॥
त्वमेवासि दैवं परं मे यदेकं सुचैतन्यमेतत्त्वदन्यं न मन्ये ।
यतोऽभूदमेयं वियद्वायुतेजोजलोर्व्यादिकार्यं चरं चाचरं च॥११॥
नमः सच्चिदानन्दरूपाय तस्मै नमो देवदेवाय रामाय तुभ्यम् ।
नमो जानकीजीवितेशाय तुभ्यं नमः पुण्डरीकायताक्षाय तुभ्यम्॥१२॥
नमो भक्तियुक्तानुरक्ताय तुभ्यं नमः पुण्यपुञ्जैकलभ्याय तुभ्यम् ।
नमो वेदवेद्याय चाद्याय पुंसे नमः सुन्दरायेन्दिरावल्लभाय॥१३॥
नमो विश्वकर्त्रे नमो विश्वहर्त्रे नमो विश्वभोक्त्रे नमो विश्वमात्रे ।
नमो विश्वनेत्रे नमो विश्वजेत्रे नमो विश्वपित्रे नमो विश्वमात्रे॥१४॥
नमस्ते नमस्ते समस्तप्रपञ्चप्रभोगप्रयोगप्रमाणप्रवीण ।
मदीयं मनस्त्वत्पदद्वन्द्वसेवां विधातुं प्रवृत्तं सुचैतन्यसिद्ध्यै॥१५॥
शिलापि त्वदङ्घ्रिक्षमासङ्गिरेणुप्रसादाद्धि चैतन्यमाधत्त राम ।
नरस्त्वत्पदद्वन्द्वसेवाविधानात्सुचैतन्यमेतेति किं चित्रमद्य॥१६॥
पवित्रं चरित्रं विचित्रं त्वदीयं नरा ये स्मरन्त्यन्वहं रामचन्द्र ।
भवन्तं भवान्तं भरन्तं भजन्तो लभन्ते कृतान्तं न पश्यन्त्यतोऽन्ते॥१७॥
स पुण्यः स गण्यः शरण्यो ममायं नरो वेद यो देवचूडामणिं त्वाम् ।
सदाकारमेकं चिदानन्दरूपं मनोवागगम्यं परन्धाम राम॥१८॥
प्रचण्डप्रतापप्रभावाभिभूतप्रभूतारिवीर प्रभो रामचन्द्र ।
बलं ते कथं वर्ण्यतेऽतीव बाल्ये यतोऽखण्डि चण्डीशकोदण्डदण्डः॥१९॥

puraḥ prāñjalīnāñjaneyādibhaktān svacinmudrayā bhadrayā bodhayantam |
bhaje'haṁ bhaje'haṁ sadā rāmacandraṁ tvadanyaṁ na manye na manye na manye ||7||

yadā matsamīpaṁ kṛtāntaḥ sametya pracaṇḍapratāpairbhaṭairbhīṣayenmām |
tadāviṣkaroṣi tvadīyaṁ svarūpaṁ tadāpatpraṇāśaṁ sakodaṇḍabāṇam ||8||

nije mānase mandire saṁnidhehi prasīda prasīda prabho rāmacandra |
sasaumitriṇā kaikeyīnandanena svaśaktyānubhaktyā ca saṁsevyamāna ||9||

svabhaktāgragaṇyaiḥ kapīśairmahīśairanīkairanekaiśca rāma prasīda |
namaste namo'stvīśa rāma prasīda praśādhi praśādhi prakāśaṁ prabho mām ||10||

tvamevāsi daivaṁ paraṁ me yadekaṁ sucaitanyametattvadanyaṁ na manye |
yato'bhūdameyaṁ viyadvāyutejojalorvyādikāryaṁ caraṁ cācaraṁ ca ||11||

namaḥ saccidānandarūpāya tasmai namo devadevāya rāmāya tubhyam |
namo jānakījīviteśāya tubhyaṁ namaḥ puṇḍarīkāyatākśāya tubhyam ||12||

namo bhaktiyuktānuraktāya tubhyaṁ namaḥ puṇyapuñjaikalabhyāya tubhyam |
namo vedavedyāya cādyāya puṁse namaḥ sundarāyendirāvallabhāya ||13||

namo viśvakartre namo viśvahartre namo viśvabhoktre namo viśvamātre |
namo viśvanetre namo viśvajetre namo viśvapitre namo viśvamātre ||14||

namaste namaste samastaprapañcaprabhogaprayogapramāṇapravīṇa |
madīyaṁ manastvatpadadvandvasevāṁ vidhātuṁ pravṛttaṁ sucaitanyasiddhayai ||15||

śilāpi tvadanghrikśamāsaṅgireṇuprasādāddhi caitanyamādhatta rāma |
narastvatpadadvandvasevāvidhānātsucaitanyameteti kiṁ citramadya ||16||

pavitraṁ caritraṁ vicitraṁ tvadīyaṁ narā ye smarantyanvahaṁ rāmacandra |
bhavantaṁ bhavāntaṁ bharantaṁ bhajantolabhante kṛtāntaṁ na paśyantyato'nte ||17||

sa puṇyaḥ sa gaṇyaḥ śaraṇyo mamāyaṁ naro veda yo devacūḍāmaṇiṁ tvām |
sadākāramekaṁ cidānandarūpaṁ manovāgagamyaṁ parandhāma rāma ||18||

pracaṇḍapratāpaprabhāvābhibhūtaprabhūtārivīra prabho rāmacandra |
balaṁ te kathaṁ varṇyate'tīva bālye yato'khaṇḍi caṇḍīśakodaṇḍadaṇḍaḥ ||19||

दशग्रीवमुग्रं सपुत्रं समित्रं सरिदुर्गमध्यस्थरक्षोगणेशम् ।
भवन्तं विना राम वीरो नरो वाऽसुरो वाऽमरो वा जयेत्कस्त्रिलोक्याम्॥ २०॥
सदा राम रामेति रामामृतं ते सदाराममानन्दनिष्यन्दकन्दम् ।
पिबन्तं नमन्तं सुदन्तं हसन्तं हनूमन्तमन्तर्भजे तं नितान्तम्॥ २१॥
सदा राम रामेति रामामृतम् ते सदाराममानन्दनिष्यन्दकन्दम् ।
पिबन्नन्वहं नन्वहं नैव मृत्योर्बिभेमि प्रसादादसादात्तवैव॥ २२॥
असीतासमेतैरकोदण्डभूषै रसौमित्रिवन्द्यैरचण्डप्रतापैः ।
अलङ्केशकालैरसुग्रीवमित्रै ररामाभिधेयैरलम् देवतैर्नः॥ २३॥
अवीरासनस्थैरचिन्मुद्रिकाढ्यै रभक्ताञ्जनेयादितत्त्वप्रकाशैः ।
अमन्दारमूलैरमन्दारमालैररामाभिधेयैरलम् देवतैर्नः॥ २४॥
असिन्धुप्रकोपैरवन्द्यप्रतापै रबन्धुप्रयाणैरमन्दस्मिताढ्यैः।
अदण्डप्रवासैरखण्डप्रबोधैररामभिदेयैरलम् देवतैर्नः॥ २५॥
हरे राम सीतापते रावणारे खरारे मुरारेऽसुरारे परेति।
लपन्तं नयन्तं सदाकालमेव समालोकयालोकयाशेषबन्धो॥ २६॥
नमस्ते सुमित्रासुपुत्राभिवन्द्य नमस्ते सदा कैकयीनन्दनेड्य ।
नमस्ते सदा वानराधीशवन्द्य नमस्ते नमस्ते सदा रामचन्द्र॥ २७॥
प्रसीद प्रसीद प्रचण्डप्रताप प्रसीद प्रसीद प्रचण्डारिकाल ।
प्रसीद प्रसीद प्रपन्नानुकम्पिन् प्रसीद प्रसीद प्रभो रामचन्द्र॥ २८॥
भुजङ्गप्रयातं परं वेदसारं मुदा रामचन्द्रस्य भक्त्या च नित्यम् ।
पठन् सन्ततं चिन्तयन् स्वान्तरङ्गे स एव स्वयम् रामचन्द्रः स धन्यः॥ २९॥
॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ
श्रीरामभुजङ्गप्रयातस्तोत्रम् सम्पूर्णम्॥

## ॥ श्री शङ्कराचार्याष्टोत्तरशतनामस्तोत्रम्॥

श्रीशंकराचार्यवर्यो ब्रह्मानन्दप्रदायकः । अज्ञानतिमिरादित्यस्सुज्ञानाम्बुधिचन्द्रमाः॥ १॥
वर्णाश्रमप्रतिष्ठाता श्रीमान्मुक्तिप्रदायकः । शिष्योपदेशनिरतो भक्ताभीष्टप्रदायकः॥ २॥

daśagrīvamugraṁ saputraṁ samitraṁ
sariddurgamadhyastharakśogaṇeśam |
bhavantaṁ vinā rāma vīro naro vā-
'suro vā'maro vā jayetkastrilokyām ||20||
sadā rāma rāmeti rāmāmṛtaṁ te
sadārāmamānandaniṣyandakandam |
pibantaṁ namantaṁ sudantaṁ hasantaṁ
hanūmantamantarbhaje taṁ nitāntam ||21||

sadā rāma rāmeti rāmāmṛtam te
sadārāmamānandaniṣyandakandam |
pibannanvahaṁ nanvahaṁ naiva mṛtyo-
rbibhemi prasādādasādāttavaiva ||22||

asītāsametairakodaṇḍabhūśai-
rasaumitrivandyairacaṇḍapratāpaiḥ |
alaṅkeśakālairasugrīvamitrai-
rarāmābhidheyairalam devatairnaḥ ||23||

avīrāsanasthairacinmudrikāḍhyai-
rabhaktāñjaneyāditattvaprakāśaiḥ |
amandāramūlairamandāramālai-
rarāmābhidheyairalam devatairnaḥ ||24||

asindhuprakopairavandyapratāpai-
rabandhuprayāṇairamandasmitāḍhyaiḥ |
adaṇḍapravāsairakhaṇḍaprabodhai-
rarāmabhideyairalam devatairnaḥ ||25||

hare rāma sītāpate rāvaṇāre
kharāre murāre'surāre pareti |
lapantaṁ nayantaṁ sadākālameva
samālokayālokayāśeṣabandho ||26||

namaste sumitrāsuputrābhivandya
namaste sadā kaikayīnandaneḍya |
namaste sadā vānarādhīśavandya
namaste namaste sadā rāmacandra ||27||

prasīda prasīda pracaṇḍapratāpa
prasīda prasīda pracaṇḍārikāla |
prasīda prasīda prapannānukampin
prasīda prasīda prabho rāmacandra ||28||

bhujaṅgaprayātaṁ paraṁ vedasāraṁ
mudā rāmacandrasya bhaktyā ca nityam |
paṭhan santataṁ cintayan svāntaraṅge
sa eva svayam rāmacandraḥ sa dhanyaḥ ||29||

|| iti śrīmatparamahaṁsaparivrājakācāryasya śrīgovindabhagavatpūjyapādaśiṣyasya
śrīmacchaṅkarabhagavataḥ kṛtau śrīrāmabhujaṅgaprayātastotram sampūrṇam ||

|| śrī śaṅkarācāryāṣṭottaraśatanāmastotram ||

śrīśaṁkarācāryavaryo brahmānandapradāyakaḥ |
ajñānatimirādityassujñānāmbudhicandramāḥ ||1||

varṇāśramapratiṣṭhātā śrīmānmuktipradāyakaḥ |
śiṣyopadeśanirato bhaktābhīṣṭapradāyakaḥ ||2||

सूक्ष्मतत्त्वरहस्यज्ञः कार्याकार्यप्रबोधकः । ज्ञानमुद्राञ्चितकरश् -शिष्यहृत्तापहारकः ॥ ३ ॥

परिव्राजाश्रमोद्धर्ता सर्वतन्त्रस्वतन्त्रधीः । अद्वैतस्थापनाचार्यस्साक्षाच्छंकररूपभृत् ॥४॥

षन्मतस्थापनाचार्यस्त्रयीमार्ग प्रकशकः । वेदवेदान्ततत्त्वज्ञो दुर्वादिमतखण्डनः ॥५॥

वैराग्यनिरतश्शान्तस्संसारार्णवतारकः । प्रसन्नवदनाम्भोजः  परमार्थप्रकाशकः ॥ ६ ॥

पुराणस्मृतिसारज्ञो नित्यतृप्तो महाञ्छुचिः । नित्यानन्दो निरातंको निस्संगो निर्मलात्मकः ॥७॥

निर्ममो निरहन्कारो विश्ववन्द्यपदाम्बुजः । सत्त्वप्रधानस्सद्भावस्सन्ख्यातीतगुणोज्ज्वलः ॥८॥

अनघस्सारहृदयस्सुधीसारस्वतप्रदः । सत्यात्मा पुण्यशीलश्च सान्ख्ययोगविलक्षणः ॥९॥

तपोराशिर् महातेजो  गुणत्रयविभागवित् । कलिघ्नः कालकर्मज्ञस्तमोगुणनिवारकः ॥ १० ॥

भगवान्भारतीजेता शारदाह्वानपण्दितः । धर्माधर्मविभावज्ञो लक्ष्यभेदप्रदर्शकः ॥ ११ ॥

नादबिन्दुकलाभिज्ञो योगिहृत्पद्मभास्करः । अतीन्द्रियज्ञाननिधिर्नित्यानित्यविवेकवान् ॥ १२ ॥

चिदानन्दश्चिन्मयात्मा पर्कायप्रवेशकृत् । अमानुषचरित्राढ्यः क्षेमदायी क्षमाकरः ॥ १३ ॥

भव्यो भद्रप्रदो भूरि महिमा विश्वरञ्जकः । स्वप्रकाशस्सदाधारो विश्वबन्धुश्शुभोदयः ॥ १४ ॥

विशालकीर्तिर्वागीशस्सर्वलोकहितोत्सुकः । कैलासयात्रसंप्राप्त चन्द्रमौलिप्रपूजकः ॥ १५ ॥

कांच्यां श्रीचक्र राजख्य यन्त्र स्थापन दीक्षितः । श्रीचक्रात्मक ताटन्क तोषिताम्बा मनोरथः ॥ १६ ॥

ब्रह्मसूत्रोपनिषद्भाष्यादिग्रन्थकल्पकः । चतुर्दिक्चतुराम्नायप्रतिष्ठाता महामतिः ॥ १७ ॥

द्विसप्तति मतोच्छेत्ता सर्वदिग्विजयप्रभुः । काषायवसनोपेतो भस्मोद्धूळितविग्रहः ॥ १८ ॥

ज्ञानत्मकैकदण्डाढ्यः कमण्डलुलसत्करः । गुरुभूमण्डलाचार्यो भगवत्पादसंज्ञकः ॥ १९ ॥

व्याससंदर्शनप्रीतः ऋष्यश्रन्गपुरेश्वरः । सौन्दर्यलहरी मुख्य बहुस्तोत्र विधायकः ॥ २० ॥

चतुष्षष्टिकलाभिज्ञो ब्रह्मराक्षसपोषकः । श्रीमन्मण्डनमिश्राख्यस्वंभूजयसन्नुतः ॥ २१ ॥

तोटकाचार्यसम्पूज्य पद्मपादर्चिताऩ्घ्रिकः । हस्तामलयोगिन्द्र ब्रह्मज्ञानप्रदायकः ॥ २२ ॥

sūkṣmatattvarahasyajñaḥ kāryākāryaprabodhakaḥ |
jñānamudrāñcitakaraś-śiṣyahṛttāpahārakaḥ ||3||

parivrājāśramoddhartā sarvatantrasvatantradhīḥ |
advaitasthāpanācāryassākṣācchaṁkararūpabhṛt ||4||

ṣanmatasthāpanācāryastrayīmārga prakaśakaḥ |
vedavedāntatattvajño durvādimatakhaṇḍanaḥ ||5||

vairāgyaniratośśāntassaṁsārārṇavatārakaḥ |
prasannavadanāmbhojaḥ paramārthaprakāśakaḥ ||6||

purāṇasmṛtisārajño nityatṛpto mahāñchuciḥ |
nityānando nirātaṁko nissaṁgo nirmalātmakaḥ ||7||

nirmamo nirahankāro viśvavandyapadāmbujaḥ |
sattvapradhānassadbhāvassankhyātītaguṇojjvalaḥ ||8||

anaghassārahṛdayassudhīsārasvatapradaḥ |
satyātmā puṇyaśīlaśca sānkhyayogavilakṣaṇaḥ ||9||

taporāśir mahātejo guṇatrayavibhāgavit |
kalighnaḥ kālakarmajñastamoguṇanivārakaḥ ||10||

bhagavānbhāratījetā śāradāhvānapaṇditaḥ |
dharmādharmavibhāvajño lakṣyabhedapradarśakaḥ ||11||

nādabindukalābhijño yogihṛtpadmabhāskaraḥ |
atīndriyajñānanidhirnityānityavivekavān ||12||

cidānandaścinmayātmā parkāyapraveśakṛt |
amānuṣacaritrāḍhyaḥ kṣemadāyī kṣamākaraḥ ||13||

bhavyo bhadraprado bhūri mahimā viśvarañjakaḥ |
svaprakāśassadādhāro viśvabandhuśśubhodayaḥ ||14||

viśālakīrtirvāgīśassarvalokahitotsukaḥ |
kailāsayātrasaṁprāpta candramauliprapūjakaḥ ||15||

kāṁcyāṁ śrīcakra rājakhya yantra sthāpana dīkṣitaḥ |
śrīcakrātmaka tāṭanka toṣitāmbā manorathaḥ ||16||

brahmasūtropaniṣadbhāṣyādigranthakalpakaḥ |
caturdikcaturāmnāyapratiṣṭhātā mahāmatiḥ ||17||

dvisaptati matocchettā sarvadigvijayaprabhuḥ |
kāṣāyavasanopeto bhasmoddhūḻitavigrahaḥ ||18||

jñānatmakaikadaṇḍāḍhyaḥ kamaṇḍalulasatkaraḥ |
gurubhūmaṇḍalācāryo bhagavatpādasaṁjñakaḥ ||19||

vyāsasaṁdarśanaprītaḥ ṛṣyaśṛngapureśvaraḥ |
saundaryalaharī mukhya bahustotra vidhāyakaḥ ||20||

catuṣṣaṣṭikalābhijño brahmarākṣasapoṣakaḥ |
śrīmanmaṇḍanamiśrākhyasvaṁbhūjayasannutaḥ ||21||

toṭakācāryasampūjya padmapādarcitānghrikaḥ |
hastāmalayogindra brahmajñānapradāyakaḥ ||22||

सुरेश्वराख्य सच्छिष्य सन्यासाश्रम दायकः । नृसिंहभक्तस्सद्रत्नगर्भहेरम्बपूजकः ॥२३॥

व्याख्यसिंहासनाधीशो जगत्पूज्यो जगद्गुरुः। इति श्रीमच्छंकराचार्यसर्वलोकगुरोः परम्॥२४॥

नाम्नामष्टोत्तरशतं भुक्तिमुक्तिफलप्रदं । त्रिसन्ध्यं यः पठेद्भक्त्या सर्वान्कामानवाप्नुयात्॥२५॥

॥ इति श्रीमच्छंकराचार्याष्टोत्तरशतनामस्तोत्रम् सम्पूर्णम् ॥

## ॥ तोटकाष्टकं॥

विदिताखिलशास्त्रसुधाजलधे महितोपनिषत् कथितार्थनिधे।

हृदये कलये विमलं चरणं भव शंकर देशिक मे शरणम्॥१॥

करुणावरुणालय पालय मां भवसागरदुःखविदूनहृदम्।

रचयाखिलदर्शनतत्त्वविदं भव शंकर देशिक मे शरणम्॥२॥

भवता जनता सुहिता भविता निजबोधविचारण चारुमते।

कलयेश्वरजीवविवेकविदं भव शंकर देशिक मे शरणम्॥३॥

भव एव भवानिति मे नितरां समजायत चेतसि कौतुकिता।

मम वारय मोहमहाजलधिं भव शंकर देशिक मे शरणं ॥४॥

सुकृतेऽधिकृते बहुधा भवतो भविता समदर्शनलालसता।

अतिदीनमिमं परिपालय मां भव शंकर देशिक मे शरणम्॥५॥

जगतीमवितुं कलिताकृतयो विचरन्ति महामहसश्छलतः।

अहिमांशुरिवात्र विभासि गुरो भव शंकर देशिक मे शरणम्॥६॥

गुरुपुंगव पुंगवकेतन ते समतामयतां नहि को। अपि सुधीः।

शरणागतवत्सल तत्त्वनिधे भव शंकर देशिक मे शरणम्॥७॥

विदिता न मया विशदैककला न च किंचन काञ्चनमस्ति गुरो।

द्रुतमेव विधेहि कृपां सहजां भव शंकर देशिक मे शरणम्॥८॥

॥ इति तोटकाचार्यविरचितम् तोटकाष्टकं सम्पूर्णम् ॥

sureśvarākhya sacchiṣya sanyāsāśrama dāyakaḥ |
nṛsiṁhabhaktassadratnagarbhaherambapūjakaḥ ||23||

vyākhyasiṁhāsanādhīśo jagatpūjyo jagadguruḥ |
iti śrīmacchaṁkarācāryasarvalokaguroḥ param ||24||

nāmnāmaṣṭottaraśataṁ bhuktimuktiphalapradaṁ |
trisandhyaṁ yaḥ paṭhedbhaktyā sarvānkāmānavāpnuyāt ||25||

|| iti śrīmacchaṁkarācāryāṣṭottaraśatanāmastotram sampūrṇam ||

|| toṭakāṣṭakaṁ ||

viditākhilaśāstrasudhājaladhe mahitopaniṣat kathitārthanidhe |
hṛdaye kalaye vimalaṁ caraṇaṁ bhava śaṁkara deśika me śaraṇam ||1||

karuṇāvaruṇālaya pālaya māṁ bhavasāgaraduḥkhavidūnahṛdam |
racayākhiladarśanatattvavidaṁ bhava śaṁkara deśika me śaraṇam ||2||

bhavatā janatā suhitā bhavitā nijabodhavicāraṇa cārumate |
kalayeśvarajīvavivekavidaṁ bhava śaṁkara deśika me śaraṇam ||3||

bhava eva bhavāniti me nitarāṁ samajāyata cetasi kautukitā |
mama vāraya mohamahājaladhiṁ bhava śaṁkara deśika me śaraṇaṁ ||4||

sukṛte'dhikṛte bahudhā bhavato bhavitā samadarśanalālasatā |
atidīnamimaṁ paripālaya māṁ bhava śaṁkara deśika me śaraṇam ||5||

jagatīmavituṁ kalitākṛtayo vicaranti mahāmahasaśchalataḥ |
ahimāṁśurivātra vibhāsi guro bhava śaṁkara deśika me śaraṇam ||6||

gurupuṁgava puṁgavaketana te samatāmayatāṁ nahi ko | api sudhīḥ |
śaraṇāgatavatsala tattvanidhe bhava śaṁkara deśika me śaraṇam ||7||

viditā na mayā viśadaikakalā na ca kiṁcana kāñcanamasti guro |
drutameva vidhehi kṛpāṁ sahajāṁ bhava śaṁkara deśika me śaraṇam ||8||

|| iti toṭakācāryaviracitam toṭakāṣṭakaṁ sampūrṇam ||